
वैशाखमासः
वर्षम् – ६८
षष्ठोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ अप्रेल २०१८

ISSN 2249-698X

# भारती

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

## संस्कृत-मासपत्रिका



वैशाखस्य तृतीयायां भार्गवः पूज्यते द्विजैः।
पूर्णिमायां च बुद्धस्य जयन्ती विश्ववन्दिता॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | संस्कृतवाङ्मये मानुषी सृष्टिः | डॉ. उषाकिरणयादवः | ५ |
| ५ | मोरारिबापुसूत्राणि | डॉ. हर्षदेव माधवः | ८ |
| ६ | श्रीकृष्णमन्त्रमहास्तोत्र-प्रस्तुतिः | आचार्य पं. नथमलशास्त्री दाधीचः | ११ |
| ७ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | १२ |
| ८ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १३ |
| ९ | वेदेषु विष्णोः स्वरूपं रहस्यं च | प्रधानसम्पादकः | १४ |
| १० | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १९ |
| ११ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २० |
| १२ | भारतभूम्याः नगराणि | अविनाश शर्मा | २१ |
| १३ | विभिन्नगृह्यसूत्राणां प्रतिपाद्यविषयः | कैलाश चन्द्र बुनकर | २४ |
| १४ | विवाहे मेलापकस्य भकूटविचारः उपयोगिता.... | गोपाल भादाणी | २६ |
| १५ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १६ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |
| १७ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**

।। श्रीशः ।।

ISSN2249-698X




# भारती

## संस्कृत-मासपत्रिका




**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामि स्व. श्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

यां देवाः सततं स्तुवन्ति जननीं ब्रह्मादयः सर्वदाम्
यत्कारुण्यलवेन मन्दमतयः प्रज्ञां परां लेभिरे।
यस्या रूपमलौकिकं हरिहरौ नो वर्णने सक्षमौ
तां पद्मासनसंस्थितां शशिसमां वन्दामहे शारदाम्।।

## मासावतरणम्

स्पर्शेणैव सुखान्वितां सुनयनां कण्डूयते कन्दलैः
गुञ्जन्तो मधुपानतो मधुकराश्चुम्बन्ति मत्ताः प्रियाम्
उद्यानेषु पिकाः शुकाः मधुलिहो गायन्ति नृत्यन्ति च,
राज्ञश्चागमनेन तेऽतिसुखिनो वैशाखमासे शुभे।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वैशाखमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075
अप्रेल, 2018
अङ्कः - 6
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# स्वातन्त्र्यम्

...✍ पं. प्यारेमोहनशर्मा

स्त्रियः समस्तास्तव देवि भेदाः। इत्यासीदस्माकं स्त्रीणां प्रति समादरणीया भावना। यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता इति भारतीया संस्कृतिः। रामः कथयति-जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। सर्वेषां प्राणिनां जननी स्त्री एव अत एवोच्यते मातृदेवो भव। एतादृशे भारते संप्रति महिलादिवसाः सम्मान्यन्ते। एकस्मिन् दिने एव तासां सम्मानं विधाय स्वीयां कर्तव्यपूर्तिं पुरुषाः सम्मानयन्ति।

वस्तुतस्तु सहस्त्रशो वर्षेभ्यः स्त्रीणां समाजे द्वितीयं स्थानमेव संलक्ष्यते। धार्मिकाख्यानेषु-अपि समानं स्थानं न दृश्यते। आखेटयुगे स्त्रियः समानरूपे संमानिता भवन्ति स्म तत्र कारणमासीत् तासां शारीरिकी ऊर्जा। ऊर्जापरिपूर्णाः स्त्रियः आखेटे पुरुषेभ्य अधिकं साफल्यमलभन्त। परन्तु यथा यथा प्रगतिः विकासश्च संजातः स्त्रीणां शोषणमवर्धत। केशनी वासन्ती च गान्धार्याः सख्यावास्ताम् अनयोः शोषणमप्यंधेन धृतराष्ट्रेन विहितम्। भीष्मपितामहो बलपूर्वकं गान्धारनरेशस्य पुत्रीं गान्धारीमन्धेन धृतराष्ट्रेन सह विवाहं विधातुमानयत् न च गान्धारी किमपि कर्तुमशक्नोत्। यावज्जीवं स्वयमप्यन्ध-तामङ्गीचकार। द्रौपदी स्वश्रुरादेशपालनाय पञ्चपुरुषाणां पत्नी समभवत्। दुर्योधनः दुःशासनमाज्ञापयत्-द्रौपदीं सभायां नग्नां विधातुं द्रोणाचार्यः, कृपाचार्यः भीष्मपितामहश्च तत् सर्वं मौनमपश्यन् श्रीकृष्णः स्वसख्युः लज्जामरक्षत्। द्रौपद्याः माता सौत्रामणिः अपि राज्ञाः पुत्रेच्छया पीडिता-आसीत्। आहुतिभिः राजा तस्यां शिखण्डीमजनयत्। कर्णस्य पत्नी वृशाली अपि कर्णेन पीडिता आसीत्। विश्वस्याख्यानेषु सर्वत्र स्त्रीणां दमनमेव मिलति। वर्तमानसमयेऽपि देशस्य राजधान्यां दिल्ल्यां कन्यया सह जाता बर्बरता बहुदिनानि वार्ताया विषयः संजातः। सिमान दव्यू नाम्नी लेखिका स्व पुस्तके ''सेकेन्ड सेक्स'' नारीवेदनामवर्णयत्। एकसहस्त्रवर्षाणामितिवृत्तं तया वर्णितम्। एकत्र सा लिखति यदि स्त्री प्रसाधनानि विहाय स्वदेहस्य वास्तविकं रूपं प्रदर्शयेत् तर्हि पौरुषदम्भिनः अकम्पन्त। शारा शगुपत्ता लिखति- ''मरदानगी का दम भरने वालों याद रहे कि औरत का बदन ही उसका वतन नहीं होता वह कुछ और भी है।''

वस्तुतः स्त्री पुरुषापेक्षयाधिका शक्तिशालिनी विद्यते। साहिरो लिखति -

**आसमा पर है खुदा और जमी पर हम,**
**आजकल वह इस तरफ देखता है कम।**

अस्तु वर्तमानकालखण्डे अस्मिन् विषये नेतृणां सर्वकाराणां च दृष्टिकोणे किञ्चित् परिवर्तनं संलक्ष्यते। यथा आइसलेण्डसर्वकारः महिलाभ्यः समानवेतनं ये न प्रयच्छन्ति ते दण्डनीया इति नियममजूघुषत्। ताभ्यः पुरुषतुल्यमेव वेतनं प्रदेयमिति नियमो निर्धारितः। परन्तु आइसलैण्डसर्वकारोऽपि सारल्येन नारचयदेतं नियमम्। 1961 वर्षे निर्धारितस्य नियमस्य पालना 1975 पर्यन्तं न जाता 24 अक्टूबर 1975 वर्षे तत्रत्या महिला कार्याणि-अवरोधितानि (हडताल) 90 प्रतिशतं महिला हडतालान्दोलने भागमगृह्णन् तदनन्तरमेव सर्वकारेण नियमपालनाय संस्थानानि बाधितानि कृतानि यदि कापि संस्था(कम्पनी) लिङ्गभेदमादायासमानं वेतनं दास्यति तर्हि सा दण्डिता भविष्यति।

आर्गनाइजेशन फार इकोनामिक कोआपरेशन एण्ड डवलपमेन्ट संस्थानस्य प्रतिवेदनानुसारं कनाडा जापान नार्वे आष्ट्रेलिया प्रभृतिदेशेषु महिलाभ्यः पुरुषाणामपेक्षया पञ्चदश-प्रतिशतं न्यूनं वेतनं प्रदीयते। यद्यपि पुरुषापेक्षया ताः अधिकं शिक्षिता भवन्ति। (आईसीडी) प्रतिवेदनानुसारं यदि वेतनस्येदमन्तरं मनागपि न्यूनं विधीयते पञ्चत्रिंशत् सदस्यदेशेषु आर्थिक-विकासस्य संभावना वर्धिष्यते। भारते समानवेतनस्य नियमो 1976 वर्षादेव निर्धारितो विद्यते। विश्वस्यार्थिलिङ्गभेदवेतने 185 तमे स्थाने विद्यते। वेतने असमानतायाः कारणं कार्यस्थलेषु पुरुषाणां नेतृत्वं शिक्षा कौशलं कार्यस्य समयादिकं मन्वते परन्तु नेदं सत्यम्। असमानवेतनस्य सत्यता प्रकाशिता न भवेदिति हेतोः संस्थानानि कर्मचारिभ्यः प्रदेयं वेतनं सार्वजनिकरूपेण प्रकाशितं न कुर्वन्ति। नियमस्तु भारतेऽपि विद्यते यल्लिङ्गभेदो न विधेयः। परन्तु नियमस्य पालना भवति न वेति सर्वकारः सावधानतया पश्येत्। ये च नियमस्य पालनां न कुर्वन्ति तेभ्यः दण्डः प्रदेयः। अन्यथा तु नियमनिर्माणं व्यर्थमेव।

# संस्कृतवाङ्मये मानुषी सृष्टिः

❑ डॉ. उषाकिरणयादवः

वयं मनुष्याः स्वभावत एव जिज्ञासवः मननशीलाश्च प्राणिनः स्मः। सर्वेषां मनुष्याणां बाल्यकालादेव प्राय इमाः जिज्ञासा भवन्ति-अस्माकं जन्म कुतः किमर्थञ्चाभवत्? सृष्टेरन्ये पदार्थाः कस्य सन्ततयः सन्ति, तेषामस्माभिः सह कः सम्बन्धोऽस्ति ? मृत्योः पश्चाद् वयं कुत्र गच्छामः मरणञ्च केन कारणेन भवति? प्रश्नेष्वेषु 'अस्माकं जन्म कुतः' इत्यस्य प्रश्नस्योत्तरं दातुं प्रयासः क्रियतेऽस्मिन् शोधलेखे।

उत्तरमिदमस्माभिरनौपचारिकौपचारिकशिक्षया आत्मानुभूत्या कर्मानुभवेन चानेकरूपेषु प्राप्यते। प्राथमिक-रूपे उत्तरस्यास्यास्तिरनौपचारिकशिक्षायां मूलतः माता-पितृभ्यां परिवारजनैश्च भवति विविधरूपेषु। तदनन्तरं प्रामाणिकरूपेणोत्तरमिदमस्भाभिः विद्यालयमहाविद्यालयानां शिक्षायाः विविधपाठ्यक्रमैः प्राप्यते। वर्णनमिदमौपचारिक-शिक्षामधिकृत्य प्रस्तूयते मया।

औपचारिकशिक्षाया आधुनिकपाठ्यक्रमेषु मनुष्य-स्योत्पत्तेर्ज्ञानं प्रायेण चार्ल्सडार्विनाख्यस्याधुनिक-वैज्ञानिकस्य क्रमिकविकाससिद्धान्तस्य अनुरूपं प्रदीयते। सिद्धान्तेऽस्मिन् मनुष्यमात्रस्य संरचना वानराख्यस्य प्राणिनः क्रमिकविकसितस्वरूपे प्रतिपादिता। विद्यार्थिभिरिदं ज्ञानं शब्दप्रमाणेन प्राप्यते। शब्दप्रमाणेषु शास्त्राणामन्येषां मतान्यपि विचारणीयानि सन्ति संस्कृतवाङ्मये च प्रमाणानां संख्याऽतिभूयसी विद्यते। प्राचीनविशालसंस्कृतवाङ्मयस्य प्रायः सर्वेषु प्रमुखप्राचीनशास्त्रेषु सृष्टेर्मनुष्याणाञ्च उत्पत्तेर्निरूपणं कृतम्। एतेषु मनुष्यस्य जन्म स्वतन्त्रप्राणिरूपे वानरादेः कस्यचिदन्यप्राणिनो विकसितस्वरूपेण वर्णितमिति लक्ष्यमस्त्यस्य शोधलेखस्य प्रमुखग्रन्थानाधारीकृत्य वर्णनमिदं प्रस्तूयतेऽधोलिखितरूपेण।

प्राचीनग्रन्थेषु ऋग्वेदः प्राचीनतमोऽस्ति। ऋग्वेदस्य पुरुषसूक्तानुसारं मानुषी मानवेतरा चाखिला चराचरा सृष्टिर्मूलत एकस्य विराट्पुरुषस्य विशालदेहोऽस्ति। पुरुषसूक्तस्य द्रष्टा ऋषिः नारायणोऽस्ति।

**'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**
**स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम्।।'**

ऋग्वेदे 10/90/1

देहस्यास्योत्पत्तिर्प्राथमिकरूपे दिव्यसंकल्परूपे दिव्यया प्रक्रिययाऽभवत्। प्रक्रियेयं 'मानसयज्ञः' इति कथ्यते।

क- कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्। तत्रैव, 10/29/4, द्रष्टा ऋषिः प्रजापतिः।

ख - यत्पुरुषेण हविषा देवा यज्ञमतन्वत। यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। यज्ञस्यार्थः मानसयज्ञोऽस्ति सायणाचार्येण स्पष्टीकृतमिदम्। तत्रैव, 10/90/6, 16, सायणभाष्यञ्च। सृष्टेरन्यपदार्थानामुत्पत्तिरिति चतुर्विधकर्म-कर्तॄणाम्मनुष्याणाञ्जन्माप्यस्मादेव मानसयज्ञादभवत्। अस्माकं पूर्वजा ऋषयश्चापि यज्ञाज्जाताः।

**''क-तस्मादश्वा अजायन्त ये के चोभयादतः।**
**गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः।।**
**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत।।**

तत्रैव 10/90/10/12''

ख- चाक्लृप्ते तेन ऋषयो मनुष्या यज्ञे जाते पितरो न पुराणो। तत्रैव, 10/130/67 ऋषिः-यज्ञः प्राजापत्यः गृत्समदऋषेर्म-तानुसारमस्माकमेकः पिताऽस्ति 'मनुः।' ''यानि मनुरवृणीता पिता नस्ता संयोश्च रुद्रस्य वश्मि।'' तत्रैव 2/33/13

अधोलिखितेषु अथर्ववेदस्य मन्त्रेष्वपि मनुष्याणां गणना पृथक्प्राणिरूपे कृता-

क- देवाः पितरो मनुष्या गन्धर्वाप्सरसश्च ये।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।।

ख- त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं विभर्षि द्विपदस्त्वं चतुष्पदः। तवेमे पृथिवि पञ्च मानवा येभ्यो........।। अथर्ववेदे, 11/7/27, 12/1/15 ऋषिः-अथर्वा

ग- यस्मिन्देवा अमृजत यस्मिन्मनुष्या उत।। तत्रैव, 12/2/17, ऋषिः- भृगुः निरुक्तवेदाङ्गे, मनुष्यशब्दस्य व्याख्याऽपि प्रतिपादिता मनुष्याः कस्मात्? मत्वा कर्माणि सीव्यन्ति। मनस्यमानेन सृष्टाः। मनस्यतिः पुनर्मनस्वीभावे मनोरपत्यं मनुष्यो वा। यास्कप्रणीतनिरुक्ते, 3/2/7 विश्वेश्वराचार्यस्य मतमस्ति यदत्र प्रथमं द्वयोः निर्वचनयोर्मनुष्याणां मनसां विशेषता कथिताऽपरद्वयोश्च वंशप्रवर्तकस्य कथनङ्कृतम्। तत्रैव, पृष्ठौ 273-74 महर्षिमनोर्मतानुसारं मनुष्याणां जन्म स्वतन्त्रप्राणिरूपे जरायुजवर्गेऽभवत्। ''किन्नरान्वानरान्मत्स्यान्विविधांश्च विहङ्गमान्। पशून्मृगान् मनुष्यांश्च व्यालांश्चोभयतोदतः।। पशवश्च मृगाश्चैव व्यालश्चोभयतोदतः। रक्षांसि च पिशाचाश्च मानुषाश्च जरायुजाः।।'' मनुस्मृतौ, 1/41, 46

कपिलमुनेः सांख्यदर्शने भौतिकसृष्टेर्विभाजनमति-स्पष्टतस्त्रिषु वर्गेषु कृतः - दैवः मानुषकः तैर्यगश्च। ''अष्टविकल्पा दैवस्तैर्यग्योनश्च पञ्चधा भवति। मानुष-कश्चैकविधः, समासतो भौतिकः सर्गः।।'' ईश्वरकृष्णस्य सांख्यकारिकायां 53 तमकारिकायां तैर्यग्मानुषक-शब्दयोर्व्याख्या वाचस्पतिमिश्रेणेत्थङ्कृता ''तैर्यगश्च पञ्चधा भवति पशुमृगपक्षिसरीसृपस्थावरा इति।'' ''मानुषकश्चैक-विधः'' इति ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषात्। तत्रैव सांख्यतत्त्वकौमुदी 184 तमे पृष्ठे। भौतिकसर्गस्यैतेषामेव त्रयाणां वर्गाणाङ्कथनमायुर्वेदे कृतमित्थम्-

''आयुर्वेदशास्त्रसिद्धान्तेष्वसर्वगताः क्षेत्रज्ञा नित्याश्च तिर्यग्योनिमानुषदेवेषु सञ्चरन्ति धर्माधर्मनिमित्तं........।'' महर्षिणा सुश्रुतेन प्रणीतायाः सुश्रुतसंहितायाः शरीरस्थान आयुर्वेदः मनुष्याणां स्वास्थ्यसंरक्षणेन चिकित्सया च सम्बन्धितोऽस्त्यतोऽत्र मनुष्यसर्गस्य भेदोपभेदाः तेषांल्लक्षणानि च सविस्तरं प्रतिपादितानि। तत्र कृतेषु वातपित्तश्लेष्ममूलकेषु भेदेषु मनुष्याणान्तुलना भौतिकसर्गस्यान्यद्वयोर्वर्गयोः प्राणिभिः सह कृता। वर्गेऽस्मिन् केवलं पैत्तिकप्रकृतियुतस्य मनुष्यवर्गस्य समानता वानरेण सह कृता न केवलं वानरेण सहापितु सर्पोलूकमार्जारादिभिः जन्तुभिः गन्धर्वयक्षाभ्यां सहापि सादृश्यङ्कथितम्। ''भुजङ्गोलूकगन्धर्वयक्षमार्जार-वानरैः। व्याघ्रर्क्षनकुलानूकैः पैत्तिकास्तुनराः स्मृताः।। तत्रैव, 4/71'' एवमेव दोषजमानवसृष्टौ तेषां तुलना पृथिव्या नभसा च सह कृताऽग्रे आचार्येण प्रकृतेस्त्रीन् गुणानधिकृत्य यद् विभाजनङ्कृतन्तदनुसारं मनुष्यास्त्रिविधाः भवन्ति सात्त्विकाः राजसाः तामसिकाश्च। तामसवर्गस्यैको भेदो भवति-पाशवः। अस्य वर्गस्य मनुष्याणां गुणक्रियादयः पशव इव भवन्ति। वर्णनमित्थङ्कृतम्- ''दुर्मेधस्त्वं मन्दता च स्वप्ने मैथुननित्यता। निराकरिष्णुता चैव विज्ञेयाः पाशवा गुणाः।।'' तत्रैव 4/95 तामसवर्गस्य द्वौ मनुष्यभेदौ मत्स्यवनप्रतिसदृशौ कथितौ। तत्रैव, 4/96-97 सात्त्विकराजसवर्गयोर्भेदानां वर्णनमपि दैवतैर्यग्वर्गस्य प्राणिनान्तुलनया सह कृतमाचार्येण। तत्रैव 4/8/93

**समीक्षा**- संस्कृतवाङ्मयस्योपर्युक्तशब्दप्रमाणैः सिध्यति यन्मानुषी सृष्टिरेका भिन्ना विधाऽस्ति। विधाया अस्याः विकासो मूलत एकस्य मननशीलप्राणितो मनुनामकाज्जीवादभवत्। विभिन्नप्रकृतियुता मानवाः विविधगुणकर्मव्यवहारेषु प्रकृतेर्विविधतत्त्वैः सह सादृश्यं वहन्ति। नारायणपण्डितस्य मते तु मौलिकप्रवृत्तिषु सर्वे मानवाः पशुभिः समाना विद्यन्ते केवलमेकः प्रमुखगुणो 'धर्मः' मनुष्यान् पशुभ्यः पृथक् करोति। ''आहारनिद्रा-भयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम्।'' धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।। हितोपदेशे, यथा वर्तमानमानवानाङ्कृते पूर्ववर्तिनामाधुनिक-विदुषां ज्ञान-विज्ञानं शब्दप्रमाणेन सह स्वीक्रियते तथैव प्राचीनऋषिमुनीनां ज्ञान-विज्ञानमपि शब्दप्रमाणरूपेणाङ्गी-करणीयम्।

वेदानां प्रामाणिकता प्रायः सर्वैरेवोत्तरकालीनै-र्विद्वद्भिरङ्गीकृता। ज्ञान-विज्ञानस्यास्य प्रत्यक्षीकरणं ऋषिभिर्मानसयोगेन कृतन्नतु बाह्यप्रयोगैः। अतएव ते ऋषय इति कथ्यन्ते स्म। निरुक्तनामके वेदाङ्गे ऋषिशब्दस्य व्याख्या कृतेत्थम्- ''साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्यो

असाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। यास्कीय-निरुक्ते, 1/6/20''

स्रष्ट्रा जगद्गुरुणा च श्रीकृष्णेनापि वेदानां प्रामाणिकता उद्घोषितेत्थम्- ''वेदैश्च सर्वैरहमेव वेद्यो वेदान्त-कृद्वेदविदेव चाहम्।'' श्रीमद्भगवद्गीतायां, 15/15 भगवतः कपिलमुनेर्मतस्य प्रामाणिकताऽपि कथिता.... सिद्धानां कपिलो मुनिः।। तत्रैव, 10/26 निष्कर्षोऽयमस्ति यन्मनुष्यः प्रारम्भत एव सृष्टेरेका पृथग्विधाऽस्ति न तु तैर्यग्सृष्टेर्विकसिता काऽपि नवीना जातिरस्ति। निष्कर्षस्यास्य प्रमाणमस्ति भगवत एवेदम्- ''चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः। तस्य कर्तारमपि मां विद्ध्यकर्तारम-व्ययम्।।''तत्रैव, 4/13

**कथितुं शक्यते यत्-** पशुपक्ष्यादय ऋषिकायमान-वैर्मनसा सृष्टा न तु वानरादिभ्यो मनुष्यो विकसितोऽभूत्। ''महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा। मद्भावा मानसा जाता येषां लोक इमाः प्रजाः।।''तत्रैव, 10/6

अध्यात्मिकदृष्ट्या मानससृजनदृष्ट्या चाखिला सृष्टिरेव मानवी इति कथितुं शक्यते किन्तु भौतिकविस्तारे तु मानवी सृष्टिरेका विशिष्टा प्राकृतिकविधा विद्यते। ऋषिकायमनुष्याः सात्त्विकसृष्टेरेके भेदेऽवगणिताः सन्त्यायुर्वेदे- ''जपव्रत-ब्रह्मचर्यहोमाध्ययनसेविनम्। ज्ञानविज्ञानसम्पन्नमृषिसत्त्वं नरं विदुः।। सुश्रुतसंहितायां, शारीरस्थाने, 4/87'' तत्र मनुष्याणामेकभेदः ब्राह्मकाय इति कथितः। वेदाध्ययनेऽ-भ्यासः गुरुजनानामादरस्य भेदस्य द्वौ प्रमुखगुणौ विद्येते, एतावङ्गीकृत्य वेदानामभ्यासः करणीय अस्माभिर्गुरुवचनेषु विश्वासश्च न केवलं पुराणं न च नवीनमेव सत्यं भवत्य-पितूभयसमन्वितं सत्यं सम्पूर्णमन्वेषणीयम्।

**सह आचार्य**
**सेमुमा. राजकीये स्नातकोत्तरकन्यामहाविद्यलाये,**
**भीलवाड़ानगरम्-311002 (राजस्थानम्)**
**चलसङ्केतांकाः - 9414812105**

# ब्रह्मलीनेभ्यः श्री जयेन्द्रसरस्वतीपादेभ्यः श्रद्धाञ्जलिः

काञ्चीपीठाधीशस्य विद्वन्मूर्धन्यस्य भारत्याः संरक्षकस्य शंकराचार्यवर्यस्य श्रीजयेन्द्रसरस्वतीपादस्य भौतिकं शरीरं विहाय ब्रह्मलीनतायाः समाचारो गते फाल्गुनमासे (फरवरीमासस्यान्ते) समस्तमपि देशं शोकाकुलं व्यदधात्। सर्वशास्त्रविशारदा इमे मुख्यपीठाधीशाः शङ्कराचार्याः संस्कृतभाषायाः, भारतीयशास्त्राणां, भारतीयसंस्कृतेः, संस्कृतसेवकानां च संरक्षका अभूवन्। पदयात्रां कुर्वाणैरेतैर्ब-हुवारं जयपुरनगर्यपि पावनीकृताऽभूत्, जयपुरीयाः संस्कृतविद्वांस आशीराशिभिरुपकृता अभूवन्। एतेषामाशिषा जयपुरे (दिल्लीमार्गे) प्राविधिकप्रशिक्षणविश्वविद्यालयोऽ-प्यारब्धोऽभूद् योऽद्य सोत्साहं शिक्षाकार्यमनुतिष्ठति।

जयपुरयात्राऽवसरे जयपुरीयैः संस्कृतसुधीभिरेते सततमभिनन्दनादिना सम्मान्यन्ते स्म। विद्वद्वराः श्रीविजयेन्द्र-सरस्वतीपादाः सम्प्रत्येषामुत्तराधिकारिणः। श्रीजयेन्द्र-सरस्वतीपादानां ब्रह्मलीनताया वृत्तमधिगम्य शोकाकुलो भारतीपरिवार एतेषां स्मृतये साश्रु श्रद्धाञ्जलिमर्पयति-

**श्रद्धाञ्जलिपद्यानि**

काञ्चीपीठपतेरशेषजगते सन्मार्गमायच्छतो
देशस्याभ्युदयाय चाऽनवरतं यात्राक्रमं बिभ्रतः।
सम्पूज्यस्य जयेन्द्रदेशिकवरस्याऽस्मिन् गते फाल्गुने
स्वर्गारोहणवृत्तमाऽऽप्य विकला गीर्वाणगीसेवकाः।। 1।।
श्रीमच्छङ्करदेशिकेन्द्रभगवत्पादस्य कीर्तिध्वजं
बिभ्राणो भुवि सन्ततं सफलयन् काञ्चीमठीयं यशः।
विश्वद्रीच उदञ्चयन् भरतभूजानां जनानां हित-
स्योद्गारानजरामरोऽयममलप्रज्ञो जयेन्द्रो यतिः।। 2।।
ब्रह्मलीनाय यतये जयेन्द्राख्याय धीमते।।
भारतीपरिवारेण श्रद्धाञ्जलिरिहार्प्यते।। 3।।

महामहोपाध्याय देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

❑ डॉ. हर्षदेव माधवः
सूत्रनिर्माता अनुवादकः

# मोरारिबापुसूत्राणि

**सत्सङ्गतौ लोकप्रतिष्ठात्यागः।**

लोकसम्पर्कः अर्थात् जनसम्पर्कः। लोकेन सह 'शोक' शब्दः सम्बद्धः। लोकसम्पर्कः शोकं ददाति। यदा लोका निन्दन्ति तदा वयं शोकविक्षिप्ताः भवामः। यदा साधुसङ्गतिः भवति तदा लोकलज्जा, लोकमर्यादा, सर्वमपि गच्छति। तुलसीदासः लोकप्रतिष्ठां वह्निं मन्यते। यदा सत्सङ्गतौ मनो रमते तदा लोकस्य स्नेहबन्धनं विगलति मीरा कथयति–

**अब तो मेरा रामनाम, दूसरा न कोई।**
**माता छोडी, पिता छोडे, छोडा सगा भाई।।**

मया ग्रामेषु दृष्टं यत्, जनाः चुल्लीकाष्ठानि रज्ज्वा बध्नन्ति। किन्तु यदा रज्जुबन्धनं न शिथिलीभवति तदा केवलं द्वौ मार्गौ स्तः। रज्जुं ज्वालय अथवा कर्तर्या छिन्धि। सत्सङ्गतौ ग्रन्थिच्छेदः अथवा ग्रन्थिदाहः कर्तव्यः।। अत एव मीरा कथयति–

**अब तो मेरा रामनाम दूसरा न कोई।**
**संत देख दौड आई ,जगत देख रोई।।**
**प्रेम आंसू डार डार, अमर बेल बोई।**
**अब तो मेरा रामनाम दूसरा न कोई।**

मीरा सत्सङ्गतिं स्वीकृत्य लोकप्रतिष्ठां विजहाति। अत एव सा विश्वं दृष्ट्वा रोदिति। साधुजनान् वीक्ष्य धावति। सा अश्रुभिः प्रेमवल्लीं सिञ्चति। मीरायाः परिमलः भक्तेः सौरभं वर्तते।

रामचरितमानसमपि करुणरसप्रधानं वर्तते। तुलसीदासेन अश्रुषु लेखनीं निधाय करुणामयं काव्यं लिखितम्।

**यत्र रामपारायणं तत्र नवरात्रि।**

**( 25-09-2014 तः 03-10-2014 पर्यन्तं छत्तीसगढस्थाने दुर्गप्रदेशे ''मानस-दुर्गा'' इत्याख्या कथा )**

आश्विनमासस्य नवरात्रिकाले छत्तीसगढ़े दुर्गनगरे रामकथायाः प्रारम्भो भवति। नवरात्रिपर्व दुर्गायाः पावनं पर्व। शिवस्य आराधना शिवरात्रौ भवति तथैव जन्माष्टमीदिने कृष्णाराधनं भवति, किन्तु मनीषिभिः मातृपूजायाः महिमा विशेषरूपेण स्वीकृतः। अत एव नवदुर्गाणाम् उपासना नवरात्रिषु भवति। यत्र यत्र रामचरितमानसस्य पारायणं भवति तत्र तत्र नवरात्रिर्वर्तते इति मे मतिः। रामचरितमानसे नवत्यधिकद्विशतवारं 'दुर्गा' शब्दस्य प्रयोगो जातः। तुलसीदासेन गिरिराजकिशोरी 'दक्षकुमारी', 'उमा', 'अम्बिका', 'भवानी', 'गौरी', 'पार्वती' इत्यादिभिः विविधैः शब्दैः देवीवन्दना कृता। अहं दुर्गापूजाकाले पारायणेन दुर्गायाः वाङ्मयीं पूजां करोमि। वस्तुतः अस्माकं भाषा वाङ्मयी पूजा अस्ति। अत एव मातृकाभिः या वाणी निष्पद्यते सा देव्याः वाङ्मयीपूजा वर्तते।

**दुर्गा रामायणस्य प्रथमा श्रोत्री।**

रामकथा स्वयमेव दुर्गास्वरूपा। रामकथा स्वयमेव अम्बा, जगदम्बा, कालिका। सैव रामकथायाः प्रथमा श्रोत्री। सा अनादिनिधना प्रथमा श्रोत्री, यया शङ्करमुखाद् इयं कथा श्रुता। यथा रामचरितमानसे वर्णितं तथा दुर्गां विना दुर्गायाः स्मरणं विना कथाश्रवणं न शक्यम्। अत एव गोस्वामिभिः कथितम्–

**''भवानीशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ।**
**याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम्।''**

दुर्गैव भवानी सैव सरस्वती, सैव लक्ष्मीः। सर्वाणि शास्त्राणि शिवमुखात् निर्गतानि पार्वत्या श्रुतानि। कदाचित् पार्वत्याः मुखात् निर्गतानि, शिवेन श्रुतानि। तथैव रामकथाऽपि शिवेन कथिता, दुर्गया श्रुता।

**श्रद्धा त्रिधा।**

तुलसीदासानुसारं भगवान् शिवः विश्वासरूपः पार्वती

श्रद्धारूपा किन्तु यथा भगवद्गीता वदति तथा श्रद्धा त्रिविधा वर्तते। गोस्वामिनः कथयन्ति यत्-

**सात्त्विक श्रद्धा धेनु सुहाई।**
**जौं हरि कृपाँ हृदयं बस आई।।**

सात्त्विकी श्रद्धा भवानी वर्तते, सैव राजसी श्रद्धा, तामसी श्रद्धा। (यदा दक्षकन्या साभिमानं रामस्य परमार्थस्वरूपम् अज्ञात्वा तस्य परीक्षां कर्तुं गच्छति यदा पत्युर्वचनं न स्वीकुरुते, यदा सीतायाः रूपं गृहीत्वा रामं पुरतः तिष्ठति तदा भवानी राजसी श्रद्धा रूपा। यदा सा रामस्वरूपं न जानाति तदा सैव व्यामोहरूपा तामसी श्रद्धा। पुनरपि पार्वतीरूपा प्रसन्ना जगन्माता सात्त्विकी श्रद्धा वर्तते।)

श्रद्धाविषये गुर्जिऐफः त्रीणि वाक्यानि वदति। गुर्जिएफः रशियादेशस्य दार्शनिकः। गुर्जिएफः कथयति यत् सचेता श्रद्धा मुक्तिरस्ति, सा जागरिता श्रद्धा,सा सावधाना श्रद्धा, नैव अन्धश्रद्धा। निरन्तरजागरिता सावधाना श्रद्धा मुक्तिरूपा। सा पुनरपि कथयति, 'सदा श्रद्धा वर्धते, श्रयते, न्यूना भवति, वृद्धिं गच्छति सा श्रद्धा दास्यरूपा। सा मनुष्यं बध्नाति।' गुर्जिएफः कथयति यत् 'यदा भीता श्रद्धा वर्तते तदा सा मूढता। भयवशात् वयं कमपि नमामः, किञ्चिदपि कुर्मः तदा सा हृदयस्य क्लैब्यम्। सा भीता श्रद्धा। सा मनुष्यं मूढं करोति।'

अत एव अहं मन्ये यत् श्रद्धा गुणातीता भवेत्। भवानी गुणातीता श्रद्धा अत एव विशेषणरहिता।

**इष्टा पञ्चायतनपूजा।**

वयं पञ्चायतनपूजां कुर्मः। सैव इष्टा। तत्र किञ्चिद् रहस्यमस्ति। वयं गणेश-सूर्य-विष्णु-शिव-दुर्गाः इति पञ्चदेवानां पूजां कुर्मः। गणेशः अर्थाद् विवेकः। यः कोऽपि यौवने विवेकं धारयति, तस्य गृहे प्रतिदिनं गणेशचतुर्थी वर्तते। सूर्यवन्दना शुभसङ्कल्पस्य उपासना। सूर्यनमस्कारो व्यायामोऽपि भवेत्। किन्तु सूर्यनमस्कार-स्य आध्यात्मिकं महत्त्वम्। वयं प्रकाशेन जीवेम-जीविष्याम इति शुभसङ्कल्प एव सूर्याराधनाऽस्ति। तमसो मा ज्योतिर्गमय इति अस्माकं प्रार्थना। विष्णुः अर्थात् व्यापकः विशालः। अस्माकं दृष्टिः व्यापका भवेत्, अस्माकं दृष्टिकोणो विशालो भवेत् तत्र सङ्कीर्णता न भवेत्। सैव विष्णोः आराधना। शिवः अर्थात् विश्वकल्याणम्। यदि वयं अन्येषां कल्याणस्य विचारं कुर्मः, तर्हि प्रतिदिनं रुद्राभिषेकः। शिवः कल्याणस्य पर्यायः। वयं "सर्वे भवन्तु सुखिनः।" इति प्रार्थनां कुर्मः। यदि अस्माकं श्रद्धा त्रिगुणातीता भवेत् तर्हि प्रतिदिनं दुर्गापूजा वर्तते।

हनुमान् प्राणतत्त्वस्य आराधना।

गोस्वामिभिः तुलसीदासैः तदनन्तरं गुरुवन्दना कृता। गुरोश्चरणरजसा नेत्रे पवित्रे कृत्वा दृष्टिविवेकं प्राप्य तुलसीदासः रामचरितमानसं लिखति। तुलसीदासैः हनुमतः प्रार्थना कृता, यथा-

**महावीर बिनवउँ हनुमाना। राम जासु जस आप बखाना।।**
**प्रवनउँ पवनकुमार खल बन पावक ग्यान घन।**
**जासु हृदय आगार बसहिं राम सर चाप धर।।**

भगवान् हनुमान् अस्माकं प्राणतत्त्वं वर्तते। प्राणतत्त्वं हनुमद्वत् सर्वेषां हितकारकम्। हनुमान् मंगलमूर्तिः वर्तते। अतो हनुमत्स्थापना अर्थात् गणेशस्थापना। रामभद्रोऽपि मङ्गलमूर्तिः। गणेशहनुमन्तौ राममन्दिरे समानान्तरे रामस्य निकटे विराजेते। द्वावपि मोदकप्रियौ, द्वौ विघ्नहर्तारौ-मङ्गलकर्तारौ वर्तेते। हनुमदुपासनया बलबुद्धिविद्यानां प्राप्तिः क्लेशविकाराणां शमनं च भवति।

**द्वापञ्चाशदधिकं तत्त्वं दुर्गा।**

मातृकायाः द्विपञ्चाशद् वर्णाः सन्ति। शक्तिपीठान्यपि द्वापञ्चाशत् सङ्ख्यकानि। सैव दुर्गा, सैव परमतत्त्वम्। त्रिपञ्चाशत्तमं शक्तिपीठम् आत्मतत्त्वम्, तदेव वयम्। तत् शक्तिपीठं नाम्ना-जपेन-ध्यानेन-कीर्तनेन-रामस्मरणेन जागरितं कर्तव्यम्। दुर्गा अर्थात् श्रद्धा। सैव समीपं नयति।

**परमप्राप्त्यै नैके मार्गाः।**

रामलक्ष्मणाभ्यां सन्ध्याकाले विश्वामित्रः मिथिलादर्शनार्थं गच्छति, तदा स कथयति- ''गच्छेताम् भवन्तौ नगरं सर्वेषां नेत्राणि च साफल्यं नयतामिति।'' यत् परमतत्त्वं वर्तते, तज्जानाति, यत् को जनः केन मार्गेण आत्मतत्त्वं प्राप्नुयादिति। कोऽपि मुखदर्शनेन, कोऽपि हस्तस्पर्शेण, कोऽपि चरणमार्गेण परमं पदं प्राप्नोति।

भवन्तः सामूहिकसाधनया स्वलक्ष्यं निर्धारितं कुर्वन्तु। यदि कोऽपि बुद्धपुरुषः प्राप्यते तर्हि लक्ष्यं प्राप्यते शीघ्रम्। अन्यथा धैर्यं धृत्वा बुद्धपुरुषार्थं प्रतीक्षां कुर्वन्तु। कस्यचित् हस्तः, कस्यचित् श्वासः, कस्यचित् स्वरः, कस्यचित् नाम - एते सर्वे मार्गाः, साधुपुरुषस्य शब्दोऽपि मार्गो भवेत्। जनको वदति यत्-

**इन्हहिं बिलोकत अति अनुरागा।**
**बरबस ब्रह्मसुखहि मन त्यागा।**
**सहज बिरागरूप मन मोरा।**
**भये थकित जिमि चंद चकोरा।।**

रामचन्द्रस्य मुखं दृष्ट्वा जनकमहाराजः ब्रह्मसुखं त्यजति। रामचन्द्रस्य मुखं स अनिमेषं पश्यति। अतएव कथयामि यत्- सिद्धानां मौनमपि मार्गो भवति। गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः। भिद्यते हृदयग्रन्थिः। कदाचित् बुद्धपुरुषस्य नेत्राश्रुबिन्दुरपि मार्गो भवति। इत्थम् आत्मा यदा जागरितो भवति तदा कोऽपि मार्गः प्राप्यते।

**श्रद्धया सत्यसिद्धिः।**

तुलसीदासः कथयति यत्- ''**भवानीशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ। याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम्।।**''

यदि स्वात्मनः श्रद्धा भवेत् तदा सर्वमपि सिद्ध्यति। श्रद्धया मिथ्यात्वमपि सत्यं भवति। यदि श्रद्धा मौलिकी भवेत्, स्वात्मनो भवेत्, तदा सत्यमपि स्वयं सिद्धं भवति। अन्धश्रद्धा वा भीतिपूर्णा श्रद्धा अस्मान् न कुत्रापि नयति, श्रद्धा तु महामाया पार्वती शैलपुत्री जगदम्बा वर्तते। अतः प्रातःकाले श्रद्धा बोद्धव्या। ( **श्रद्धां प्रातर्हवामहे श्रद्धां माध्यंदिनं परि। श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः। ऋग्वेद-10-151-5** )

यदा श्रद्धा जागरिता भवेत् तदा प्रातःकाले- मध्याह्ने- अस्माकं जीवनस्य मध्याह्ने-अस्माकं श्रद्धायाः विश्वासपूर्वकं लोकमङ्गलाय विनियोगः कर्तव्यः। प्रथमम् अस्माकं जागृतिः भवेत्। अनन्तरं समाजस्य जागृतिः भवेत् स्वात्मकल्याणं न सिद्ध्यति विना श्रद्धाम्।

**नानाविधानि तपांसि।**

रामचरितमानसे भगवत्याः उमायाः तपसो वर्णनमस्ति। ब्रह्मचारिणी उमा तपस्तप्त्वा शिवमाराधयितुं प्रयतते। तुलसीदासैः तपो महिमा गीतः। देशकालानुसारं नानाविधानि तपांसि क्रियन्ते। तपसः परिभाषा परिवर्तिता। कोऽपि कृषीवलः क्षेत्रे श्रमं कृत्वा सस्योत्पादनं करोति, तदपि तपः। वैज्ञानिकः अहर्निशं श्रमं विस्मृत्य प्रयोगान् करोति तदपि तपः। वयं गृहं निर्मलं कर्तुं, मार्गान् स्वच्छान् कर्तुं, राष्ट्रं निर्मलं कर्तुम् उद्योगं कुर्मः, तदपि आधुनिकं तपः।

**भगवच्छवेर्देवमन्दिरे स्थापना सरला, चित्ते कठिना।**

रामचरितमानसं चित्तविषयकं निरूपणं करोति। चित्तं निर्मलं कर्तुं दुष्करम्। कृष्णमूर्तिः कथयति यद्, यदा वयं ग्रामान्तरं गच्छामः तदा प्रवासात् पूर्वं मञ्जूषायां वस्त्राणि निधाय गच्छामः। प्रवासमञ्जूषायां यद् वस्त्रं सर्वप्रथमं निवेशितं तत् वस्त्रं सर्वान्तिमं निःसरति। यानि वस्त्राणि उपरि, अन्तिमे काले निक्षिप्तानि तानि प्रथमं प्राप्यन्ते। इत्थं चित्ते ये अन्तिमाः संस्काराः ते सर्वप्रथमं निस्सरन्ति। किन्तु जन्मान्तराणां संस्काराः विलम्बेन निर्गच्छन्ति। अत एव अहं कथयामि यद्, बुद्धपुरुषस्य छविः मन्दिरे न स्थापितव्या किन्तु चित्ते स्थापितव्या। भगवच्छवेः स्थापनां चित्ते कुरु, न मन्दिरे। इष्टदेवो बुद्धपुरुषो वा भवान् यत्र यत्र गच्छति तत्र तत्र साक्षीरूपेण आगमिष्यति।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

# श्रीकृष्णमन्त्रमहास्तोत्र-प्रस्तुतिः

❑ आचार्य पं. नथमलशास्त्री दाधीचः

श्रीमन्तो भगवद्भक्तिपरायणाः स्वाध्यायनिष्ठाः पाठकाः सन्तो महान्तो विद्वांसश्च सम्यग्जानन्त्येव यदखिलकोटि-ब्रह्माण्डनायकः परिपूर्णतमो भगवान् श्रीकृष्णः श्रीमद्-भागवतशास्त्रे यत्र तत्र विभिन्नकथा-प्रसंगेषु ध्रुवप्रह्लाद-भीष्मादिमहाभागवतैर्ब्रह्मर्षिदेवर्षिराजर्षिवर्यैरिन्द्रादिदेवैर्वे-दस्तुतिभिश्च सविस्तारं संस्तुतोऽस्ति। वस्तुतस्त्वस्मिन्-भक्तिक्रियायोगे वैदिकतान्त्रिकपूजापद्धतौ वा भगवत्स्तो-त्रस्तुतीनां महत्त्वमनिवार्यतो विशिष्टरूपेण स्वीकृतमस्ति।

विषयेऽस्मिन् महाभागवतमुद्धवं प्रति भगवता श्रीकृष्णेन प्रोक्तं यत्-

**स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि।**
**स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत्।। भा.11/27/45**

साधकः पुरुषसूक्तादिवैदिकसूक्तैः पौराणिकैः प्राकृत-स्तोत्रैर्भगवन्तं वासुदेवं स्तुत्वा दण्डवत् वन्देत इति। अत्र '**प्राकृतैः स्तोत्रैरपि**' इति निर्दिश्य ज्ञानावतारेण भगवता श्रीवेदव्यासेन प्रमाणितं यत् प्रवर्तमानेऽस्मिन् युगेऽवता-रितैर्विभूतिमद्भिराचार्यवर्यैर्भक्तिनिष्ठैर्भागवतधर्ममर्मज्ञैः सात्त्विकैः सद्भिर्विज्ञैर्विद्वद्भिर्विरचितैः प्रामाणिकैः संस्कृत-स्तोत्रैरप्युत्तमश्लोकं भक्तवत्सलं भगवन्तं स्तुत्वा साधकोऽ-भीष्टसिद्धिं लभते। यतोहि-

**खमशोभत निर्मेघं शरद्विमलतारकम्।**
**सत्त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम्।।**
**( भा. 20/11/43 )**

अहा ! शरदागमे विमलतारकं निर्मेघं गगनं कियत् शोभते। यथा सत्त्वगुणसंयुक्तं साधकस्य निर्मलं चित्तं शब्दब्रह्मणोऽर्थस्य तात्पर्यभूतस्य परब्रह्मणो वा दर्शनं साक्षात्कारं कारयतीति दिक्। सिद्धान्तेनानेन ज्ञायते यत् कैश्चिदपि कुत्रचिदपि शान्तैर्निरपेक्षैः सद्भिर्विद्वद्भिस्तत्तद्-भगवद्भक्तिरसभावधारायां सत्त्वगुणयुक्ते स्वचित्ते विलीने सत्येव भगवत्प्रीत्यर्थं शब्दब्रह्मोपासना- ''भगवद्भक्ति-स्तोत्ररचना'' वा विधीयते, नान्यथा।

**एवञ्च-** सात्त्विकोपासना-पद्धतिवर्णितशास्त्र-स्तोत्र-मन्त्र-देवतानां तारतम्येन ज्ञायते यद् भागवता-दिशास्त्रसाराणि स्तोत्राणि, स्तोत्रसाराश्च कोटिशो देवमन्त्रास्तथैव मन्त्राधीनाश्च देवताः सन्तीति।

**द्वापरे-** श्रीमद्भगवद्गीतोक्तमेतत्सर्वगुह्यतमं भगवद्वचः-

**सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।**
**( गीता-18-66 )**

अत्रानन्यभावेन भगवतः श्रीकृष्णस्य शरणागति-रहस्यमभिव्यनक्ति। **युगेऽस्मिन्नपि** श्रीमद्भिराचार्यवर्यैः परमकारुणिकैर्महाप्रभु-श्रीवल्लभाचार्यैरयमष्टाक्षरो मन्त्रः (श्रीकृष्णः शरणं मम) श्रीवैष्णवदीक्षार्थिनां हिताय प्रदत्तोऽस्तीति परमानन्ददायकः सत्संगप्रसंगः। एष मन्त्रः श्रीमद्भगवद्गीताशास्त्रसारमाचार्यकृतं मन्त्रात्मकं भावमयं भाष्यमपि निगदितुं शक्यते।

**अन्ते हि भगवत्कृपया-**

**श्रीमद्भिर्वल्लभाचार्यैः प्रेरितो मानसे मुदा।**
**प्रवृत्तोऽहं पराभक्त्या स्तोत्रेण कृष्णकीर्तने।।**

श्रीकृष्णभक्तिनिष्ठानां संस्कृतानुरागिणां कृते नित्य-स्वाध्यायसिद्धये शब्दब्रह्माराधनत्वेन भक्त्या विरचितं श्रीमन्नारायणस्य सनकाद्यवतारानुकीर्तनपुरस्सरं रामकृष्ण-हरिनामधामगुणलीलानुरञ्जितं सद्यः सर्वाभीष्टसिद्धिप्रदं कृष्णप्रीतिकरञ्च तन्मन्त्रात्मकमिदं महास्तोत्रं श्रीकृष्णकीर्तन-प्रवृत्त्या प्रमुदितेन प्रपन्नेनानेन प्राणिना प्रस्तूयते। अत्र समुद्दिश्यते च ध्येयवाक्यम् ''**शमस्तु नित्यपाठेन कृष्णे नो भक्तिरस्त्विति**''

**( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )**

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्ण:शरणं मम )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

## अथ ध्यानम्- ( वन्दना )

श्रीनाथं राधिकानाथं गोपगोपीजनप्रियम्।
गोवर्धनधरं देवं नौमि गोकुलमण्डनम्।।
दक्षिणे यमुना यस्य वामे च वृषभानुजा।
परितो गोपिका यस्य तं वन्दे नन्दनन्दम्।।

ऊँ सर्वश्रेयस्करः श्रीशः श्रीनिवासः सतां पतिः।
श्रीनिधिः श्रीप्रदः श्रेयः श्रीकृष्णः शरणं मम।। 1।।

आद्योऽनन्तो ह्यजोऽनादिर्व्यक्तोऽव्यक्तोऽच्युतोऽव्ययः।
पुरुषः प्रणवातीतः श्रीकृष्णः शरणं मम।। 2।।

परात्परतरः श्रेष्ठः प्रत्यगात्मा पुरातनः।
परिपूर्णतमः कृष्णः श्रीकृष्णः शरणं मम।। 3।।

ब्रह्मण्यो ब्रह्मविद् ब्रह्म गोब्राह्मणहितावहः।
प्रादुर्भूतः परं ब्रह्म श्रीकृष्णः शरणं मम।। 4।।

ओंकारो बिन्दुसंयुक्तो ब्रह्मविष्णुशिवात्मकः।
अक्षरं परमं ब्रह्म श्रीकृष्णः शरणं मम।। 5।।

प्रणवः प्राणदः प्राणः प्राणेशः प्राणवल्लभः।
आत्मेन्द्रियमनोबुद्धिः श्रीकृष्णः शरणं मम।। 6।।

क्षेत्रज्ञः सर्वभूतानां पूतात्मा पापनाशनः।
ईश्वरः सर्वधर्मज्ञः श्रीकृष्णः शरणं मम।। 7।।

जगत्प्रभुर्देवदेवः सर्वलोकमहेश्वरः।
महत्तेजो महद्ब्रह्म श्रीकृष्णः शरणं मम।। 8।।

विश्वात्मा भगवान् विष्णुरच्युतो विश्वभावनः।
दामोदरो हृषीकेशः श्रीकृष्णः शरणं मम।। 9।।

सत्यव्रतः सत्यपरः सत्यः सत्यात्मकः शिवः।
सत्यनारायणो देवः श्रीकृष्णः शरणं मम।। 10।।

भगवानुत्तमश्लोकः पुण्यश्लोकोऽच्युतो विभुः।
सर्वभूतात्मभूतात्मा श्रीकृष्णः शरणं मम।। 11।।

यज्ञो यज्ञेश्वरो विष्णुर्वेदवेद्यो विराट् स्वराट्।
ब्रह्मणो हि प्रतिष्ठायं श्रीकृष्णः शरणं मम।। 12।।

जले कृष्णः स्थले कृष्णः कृष्णो देवे दिवाकरे।
गगने पवने कृष्णः श्रीकृष्णः शरणं मम।। 13।।

कृष्णो मे हृदयाम्भोजे कृष्णो मे तिलकाङ्कितः।
शिखायां मस्तके मकृष्णः श्रीकृष्णः शरणं मम।।14।।

कण्ठे करतले कृष्णः बाह्वोः कृष्णः कलाप्रियः।
नाभौ वक्षस्थले कृष्णः श्रीकृष्णः शरणं मम।। 15।।

कृष्णो वाचि त्वचि कृष्णः कृष्णो मे सप्तधातुषु।
प्राणे प्राणेश्वरः कृष्णः श्रीकृष्णः शरणं मम।। 16।।

रोमकूपेषु मे कृष्णः भवकूपभयापहः।
हत्पुण्डरीकमध्यस्थः श्रीकृष्णः शरणं मम।। 17।।

कृष्णे रतिर्गतिः कृष्णे कृष्णे दृष्टिः स्थिरा धृतिः।
शाश्वती मे स्मृतिः कृष्णे श्रीकृष्णः शरणं मम।। 18।।

मनो मे रमतां कृष्णे चित्तं तद्रूपचिन्तने।
बुद्धिर्निविष्टा मे कृष्णे श्रीकृष्णः शरणं मम।। 19।।

सुखदः शान्तिदः सौम्यो भक्तकामप्रदो हरिः।
सर्वेशः सत्यसंकल्पः श्रीकृष्णः शरणं मम।। 20।।

विश्वात्मा विग्रहातीतो भक्तेच्छोपात्तविग्रहः।
विग्रहे विजयी वीरः श्रीकृष्णः शरणं मम।। 21।।

विश्वयोनिः स्वयं जातो विश्वेशो विश्वजीवनः।
विश्वभर्ता जगन्नाथः श्रीकृष्णः शरणं मम।। 22।।

परमात्मा परानन्दः पुराणः पुरुषोत्तमः।
परेशः परमोदारः श्रीकृष्णः शरणं मम।। 23।।

नारायणो महाविष्णुः शेषशय्यासनो हरिः।
शुद्धसत्त्वस्वरूपात्मा श्रीकृष्णः शरणं मम।। 24।।

अव्यक्तोऽतिदुराराध्यो निर्गुणो व्यापकोऽव्ययः।
साकारः सगुणो व्यक्तः श्रीकृष्णः शरणं मम।। 25।।

इति श्रीकृष्णमन्त्रमहास्तोत्रे प्रथमो विरामः।।
''श्रीकृष्णः शरणं मम''

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# आञ्चलिकेतिहासप्रशस्तिः

राजस्थान प्रदेशे ''शेखावाटी'' ति नाम्ना प्रथितमञ्चलं यथा बिड़ला-फतेहपुरिया प्रभृतीनामुद्योगपतीनामुद्भवस्थलरूपेण परिज्ञातमस्ति तथैव दानिनां, धर्मसेवकानां, संस्कृत-संस्कृतिसंरक्षकाणां जनानां, संस्कृताध्यापकानां चाऽपि प्रमुखसेवास्थलीरूपेण सुविज्ञातमस्ति। अस्मिन्नञ्चले ये श्रेष्ठिनोऽभूवन्, तेषां धर्मसेवाया एको मार्गोऽभूत्- ''धर्मादा'' नाम्ना स्वकीयस्याऽऽयस्य षोडशांशं ते मन्दिराणां संस्कृत-पाठशालानां वा कृते समार्पिपन्। अनेन हि तत्र ग्रामे ग्रामे, नगरे नगरे संस्कृतपाठशालाश्छात्राणां, पुरोहितानां, धर्मगुरूणां च शिक्षाव्यवस्थाद्वारा समुद्भवं परिष्कारं च समपीपदन्। रामगढ-फतेहपुर-रतनगढ़-लक्ष्मणगढ़-चिड़ावा-प्रभृतिस्थलेषु संस्कृतपाठशालाः शताब्दीभ्यः कार्यरता आसन्। पुरोहिताः, पूजकाश्च धर्मवृक्षाणां, संस्कृतविद्यावृक्षाणां च सेचनं कुर्वाणास्तिष्ठन्ति स्म। कलियुगस्य प्रभावः कारणादस्मादेव नाऽभूल्लक्षितः, साम्प्रतं तु कथैवाऽन्यादृशी। न किमपि वक्तुं शक्यते दुर्दशाया अस्याः कृते सम्प्रति। अस्तु।

कुतूहलस्य, सन्तोषस्य चाऽयं विषयो यत् रतनगढ़नामके नगरे (चूरूजिलास्थे) ये संस्कृत-विद्यालया अभूवन्, ये च संस्कृतपण्डिता अभूवन्, निकटस्थेषु शेखावाटीप्रान्तीयेषु स्थलेषु वा ये सुधियोऽभूवन्, यैश्चान्यान्येषु प्रान्तेष्वपि गत्वा स्वभूमेर्यशोवृद्धिः कृता तेषां परिचयाय रतनगढस्थेन विदुषा पं. विष्णुदत्तशास्त्रिणा त्रयोदशसर्गात्मकं संस्कृतकाव्यं लिखितमस्ति, प्रकाशितं च तत्। अस्मिन् स्वतन्त्रशैल्यां संस्कृतपद्येषु भूमेरस्याः वरिष्ठानां प्रतिष्ठापकानां श्रेष्ठिनां, गुरूणां च स्मरणं प्रारम्भेऽस्ति। षष्ठे सर्गे देवालयानां साधीयान् समुल्लेखः, नवमे सर्गे ''साधूनां सन्तानां'' (सतां) दशमे नेतृणां विधायकादीनां, एकादशे साहित्यकाराणां चोल्लेखः समाविष्टोऽस्ति। द्वादशे सर्गे भारतीयानां नेतृणां, राज्ञां वा प्रसङ्गागतरूपेणोल्लेखः प्रशस्तिश्चानुस्यूताऽस्ति। गौशाला-स्मरणप्रसङ्गेन गवां महिमाऽप्यत्र वर्णितः। त्रयोदशे सर्गे पं. विष्णुदत्तशास्त्रिणा कविपरिचयो ग्रथितोऽस्ति। यत्र स्ववंशस्य, परिवारस्य च विवरणं द्रष्टुं शक्यते, स्वकीयशिक्षाया जीवनयात्रायाश्चापि।

इत्थं रतनगढभूभागस्य तत्सम्बद्धानां संस्थानां विदुषां च परिचायकं काव्यमिदं नूतनः प्रयोग इति रूपेण निश्चितमेव पाठकानां रुचिमाकर्षेदिति विश्वसिमः।

**रतनगढगौरवम्ः कविः पं. विष्णुदत्तशास्त्री, प्रका. विष्णुदत्त शास्त्री मंत्री रतनगढ पण्डित परिषद् पण्डितपुरम् रतनगढ चूरू पृ.सं. 580 मू. 1100/-.**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

**भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम – भारती**

**खाता संख्या – 2139101912502**

**IFS Code - CNRB0002139**

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# वेदेषु विष्णोः स्वरूपं रहस्यं च

अपूर्वः खलु भगवतो वेदस्य महिमाऽस्मिन् देशे। ''मानवीयस्य पुस्तकालयस्य सर्वप्रथममिदं पुस्तकं यदृग्वेद इति'' न केवलमस्माकं भारतीयानामियं स्थापनाऽपि तु विश्वस्य शोधविदुषां सुप्रथितो घण्टाघोषोऽयं विश्वकोषा-दिष्वद्यापि श्रोतुं शक्यो द्रष्टुं च। वेदोऽखिलो धर्ममूलमिति जानीम एव शताब्दीभ्यो वयम्। सर्वं वेदात् प्रसिद्ध्यतीति मन्यामहेऽपि किन्तु प्रायः कतिपयशताब्दीभ्यो विशेषतश्च भक्तेरान्दोलनप्रवृत्तेरनन्तरं वेदविमर्शस्य वेदार्थानुशीलनस्य च तस्मिन् प्रवाहे उपालक्ष्यत किञ्चिद्वैरल्यं यो दृष्टिगोचरो-ऽभूत्प्राक्। ''इति श्रुतिः'' इत्यादि प्रतीकवचनैः श्रुतेर्नाम्ना प्रायश उपनिषद उद्ध्रियन्ते स्म दर्शनविमर्शकैः, भक्तेराचार्यैः। वेदपाठस्य, कर्मकाण्डस्य च परम्परा त्वनाद्यनन्तैव जागर्ति देशे किन्तु वेदार्थविमर्शः शैथिल्यमगात्। महाविदुषा सायणेन आर्यसमाजसंस्थापकेन स्वामिदयानन्देन वा वेदार्थ-विमर्शस्य भाष्यप्रणयनस्य च यः कश्चिन्नूत्नः पन्था उदभावि, तदनु तत्त्वचिन्तनं नूत्नतया प्रावर्तत। बहवः सनातनधर्मिणस्तदि-दमपि कथयन्तः श्रूयन्ते स्म यद् वेदेष्वनन्ता अर्था निहिताः, एक एवार्थो योऽस्माभिर्व्याख्यायते सत्यत्वं बिभर्तीति कथं कथयितुं शक्यते, अतो वेदार्थव्याख्यानमार्यसामाजिकानामेव किंचिल्लक्षणमित्यपि बहुधा श्रूयते स्म।

किन्तु सनातनधर्मानुयायिभिरपि मूर्धन्यैर्मनीषि-भिर्वेदव्याख्यानस्य तत्त्वचिन्तनपराः सरणीरुद्भाव्य तेषु निहितानां बहुमूल्यानां गूढानामर्थानां गरिमा कश्चिदाविष्कृतो येन वैदेशिका अपि विसिष्मियिरे इति जानीम एव वयम्। सायणाचार्यैर्यथा दक्षिणभारते वेदार्थव्याख्यानस्य सुतरां महनीयः, सर्वथाऽजराऽमरः पन्थाः प्रत्यपादि वैदेशिकानां व्यापारेभ्यः पूर्वं तथा जयपुरीयैः पं. मधुसूदनौझामहाभागैरपि ऊनविंश्याः शताब्द्याः पर्यन्ते विंश्याश्च प्रारम्भे प्राणविद्याया इतिहासस्यान्तरिक्ष-विज्ञानादीनां च तत्त्वार्था वेदेष्वन्वेषिताः प्रसारिताश्च सर्वजनसमक्षं यैर्लण्डनप्रभृतिनगरेष्वपि विद्वांसो विस्मापिताः।

एतस्य श्लाघनीयः परिणामोऽयमप्यभूद् यद् वेदेषु तादृशानि तत्त्वानि, तादृशानि वैज्ञानिकरहस्यानि, तादृशा गूढ-संकेतास्तेषामाकूतादयश्च नूत्नतया बुद्धिपथमायाता ये खल्वाधुनिके युगेऽपि क्षोदक्षमाः।

आधुनिके युगे मानवीयप्रतिभया यानि नूतनानि तत्त्वान्याविष्कृतानि, अन्तरिक्षविज्ञाने, ग्रहविज्ञाने, सृष्टिविज्ञानेतिहासे वा गवेषणोत्थानि यानि तथ्यानि नूत्नतया सूचितानि तेषां गूढः संकेतो वेदेषु यद्युपलभ्यते तर्हि तदिदमेवोहितुमुचितं यदृषिप्रतिभया तत्सर्वमस्मिन् देशे प्रागेव लक्षितमासीत्। इदं तु सकौतुकं सुधीभिर्दृश्यत एव यत्पुराणेषु, दर्शनेषु, अन्येषु वा शास्त्रेषु यानि विविधानि प्रस्थानानि विवृतानि दृश्यन्ते तेषां सर्वेषां मूलं वेद एव। किं बहुना, यत्खलु, शोधविद्वद्भिर्भक्ति-आन्दोलननाम्नाऽभिधीयते तस्मिन्नभियानेऽपि वेदमूल-कानि तत्त्वान्येव ''भगवन्नाम्ना'' उपास्यत्वेन वर्णितानि, ''ईश्वरनाम्ना'' वाऽभिहितानि। भगवच्छब्दो भक्तिमार्गप्रतीकभूतो वेदेषु नोपलभ्यते, ईश्वरशब्दोऽपि योगमार्गप्रतीकभूतो न तस्मिन्नर्थ उपलभ्यते यः खलु भक्तिमार्गे योगमार्गे वा व्याख्यातोऽस्ति किन्तु भक्त्यान्दोलनानन्तरं विशालं साहित्यं भक्तेः सर्वोत्कृष्टतां प्रतिपादयत्सृष्टं विद्वद्भिराचार्यैश्च। अद्यत्वे हि सर्वात्मना प्रकृष्टमतयो विद्वद्धौरेया भूयस्यां संख्यायां भक्तिमार्गस्य सर्वोच्चतां प्रतिपादयितुं कथासत्रेषु हृदयावर्जकै-र्वाग्गुम्फैर्भाषमाणाः श्रूयन्ते, ग्रन्थांश्च विलिखन्ति। बहवस्तु भक्तेर्वेदमूलकतामपि प्रतिपादयन्ति विस्मयकारिणा पथा।

सर्वस्यास्य सहस्राब्दीर्व्याप्य विलिखितस्य वाङ्मयस्यानुशीलनेन हृदयहर्षकाणि बहूनि तथ्या-न्याविर्भवेयुः। वेदेषु यादृशी प्रतिपादनसरणिरासीद् विज्ञानेत्यद्यत्वेऽभिधीयमानानां तत्त्वानां, तामाधृत्य पुराणेषु प्रतीकविधया कथमुपाख्यानानि प्रादुरभूवन्, तदनु कथं भक्तिमार्गीयैराचार्यधौरेयैस्तेषु यत्-किञ्चित्परिवर्तन-परिवर्धनादीनि विदधानैर्भक्तिसंवलितः पन्था अनुशिष्ट इत्यादि स्फोरयितुं दिङ्मात्रमत्रोपन्यस्यते।

भक्त्यान्दोलनं हि द्विधा विभक्तं विमृश्यते-शैवं वैष्णवं

च। दक्षिणभारते नायनार आलवार इत्याद्यभिधा-नैरभिहितमिदं प्रस्थानद्वयम्। उत्तरभारतेऽपि शिवभक्तानां परम्परा सुविदिता। किन्तु प्राबल्यमवाप्तं वैष्णव-भक्त्यान्दोलनेन यत्र रामानुज-मध्व-निम्बार्क-वल्लभाद्याचार्याणां विविधाः पन्थानः परोलक्षान् जनानावर्जयामासुः। वैष्णवभक्तेः प्राबल्यं यदवधि प्रवृत्तं तदारभ्य विष्णोः सर्वातिशायित्वं, समस्तसृष्टिनियामकत्वं च प्रथितमभूत्। धर्मानुष्ठानसङ्कल्पादिषु ॐ विष्णुर्विष्णु-र्विष्णुरित्याद्युच्चारणं प्रथमं क्रियतामिति परम्परा प्रावर्तत, ''विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणः प्रथमार्धे परार्धे'' वा कालगणनाप्रक्रमत्वेनोदाह्रियत। अनेन वेदकालीना-यामवधारणायां यत् परिवर्तनं प्रत्यक्षमभूत्-तदपि विदांकुर्वन्तु बुधाः। तत्र प्रजापतिः सृष्टिप्रवर्तको नियामकश्चोच्यते, इन्द्र-वरुणादयो देवा यज्ञादिकर्मसु प्रमुखतः स्म्रियन्ते।

वेदेष्विन्द्रस्य परमत्वं सुप्रथितम्। विश्वस्मादिन्द्र उत्तरः (ऋक्-10/79/1) इत्यादि सर्वत्राम्नातमस्ति। अत एव विष्णोरुपेन्द्रत्वं प्रथितमासीत्। अमरकोषेऽपि ''विष्णुर्नारायण'' इत्यादिना विष्णुनामान्युद्धरन् कोषकारः कथयति ''उपेन्द्र इन्द्रावरजः।'' वेदकाले इन्द्रावरजत्वं विष्णोरभ्युपगतमासीत् किन्तु यो विष्णुः समस्त-ब्रह्माण्डनियामको, ब्रह्मणोऽपि प्रेरकः स इन्द्रादवरः कथं संभवतीति परस्ताद् भक्तिप्रमुखे काले न कथमपि समौचित्यावहमनुभूतं वैष्णवैः। बह्व्यः कथास्तादृश्यः श्रुता एव स्युर्भवद्भिर्यासु विष्णोः, अथवा तस्यावताराणां भ्रूभङ्गेन इन्द्रसदृशा देवा उद्भवन्ति, विलीयन्ते चेति व्यञ्जितमस्ति। श्रीमद्भागवतादिषु तु श्रीकृष्णेनेन्द्रस्य धर्षणं कथं विविधेषु रूपेषु कृतमिति वर्णितमस्त्येव। गोवर्धनपर्वधारणप्रसङ्गेऽन्यत्र च बहुत्र स्फुटमिदं सर्वम्।

अत एव तादृशा अपि प्रयत्ना व्यधीयन्त विद्वज्जनैरुपेन्द्रशब्दस्य इन्द्रावरजशब्दस्य च निर्वचनं विष्णुप्रामुख्यपरं चिकीर्षद्भिर्यत्र विभिन्नाभिर्व्युत्पत्तिभिरिन्द्रो विष्णोरवरः साध्येत। एतस्य कतिचन सङ्केता व्याख्यासुधाप्रभृतिषु अमरकोषटीकासु शक्यन्ते द्रष्टुम्। वैष्णवसमाजेनोपेन्द्रशब्दस्य व्युत्पत्तिः ''उपगत इन्द्रोऽस्य'' इत्यादि चिकीर्षिता स्यात् ''इन्द्रावरज'' शब्दस्य च व्युत्पत्तिः 'इन्द्रः अवरजोऽस्य' इति चिकीर्षिता स्यात्। अतः व्याख्यासुधाकारो भानुदीक्षितो लिखति ''यत्तु उपगत इन्द्रोऽस्य इति, तन्न।'' ''कुगति'' (2/2/18) इत्युपन्यास-विरोधात् इत्थमुपेन्द्रशब्दे मतान्तरमुल्लिख्येन्द्रावरजशब्दं भानुदीक्षितो व्युत्पादयति ''इन्द्रस्यावरं जातः'' अन्येष्वपि (3/2/101) इति डः। इन्द्रः अवरजोऽस्य ''वा'' इत्यपि पर्यन्ते लिखितुं स न विस्मरति । अस्तु, तदिदं तु भक्तिमार्गप्रामुख्यकालीनानां प्रयासानां दिङ्मात्रं दर्शयितुमत्र प्रसङ्गवशादुपन्यस्तम्।

परवर्तिनि काले वैष्णवभक्तिप्रस्थानेषु या अवधारणा, ये वै सिद्धान्ता, यानि वा तत्त्वानि बद्धमूलानि प्राप्यन्ते तेषां वैदिका उत्सा गवेषयितुं शक्यन्ते इति प्रदर्शयितुं कतिपयानि तथ्यान्युद्ध्रियन्तेऽत्र।

विष्णुः खलु भक्तिप्रस्थाने कृष्णरूपेण वर्ण्यमानो गोपालः, गोचारणपरायणः वृष्णिवंशजश्चाख्यायते। स एव भगवान् गोलोकनिवासी, स एव मथुरावासी, मधुपुरीवासी मधुरभक्तेरालम्बनं वर्तते यस्य स्तुतिः ''मधुराधिपतेरखिलं मधुरम्'' इत्यादिभिर्मधुराष्टक- प्रभृतिभिः सूक्तैरनुष्ठीयते वल्लभाचार्यप्रभृतिभिः ब्रह्म-विष्णु-महेशेति-त्रिदेवसमष्टौ ब्रह्मा जनयिता विष्णुः पालयिता शिवश्च संहर्तेत्याख्यायते। सर्वेषामेषां प्रत्ययानां मूलं वेदकालीनं विष्णुस्वरूपं तत्सम्बन्धि वाङ्मयं चास्ति। किं बहुना विष्णोर्दशावताराः पुराणेषु, चतुर्विंशत्यवताराः श्रीमद्भागवतादिषु ये वर्ण्यन्ते तेषामपि पूलं वेदेषु मृगयितुं शक्यम्। विष्णोर्वामनावतारो दैत्यराजाद् बलेर्दक्षिणामयाचत, बलिश्च पादत्रयपरिमितां भूमिं दातुं सहर्षमनुमेने, वामनश्च पादत्रये त्रिलोकीं व्यक्रामदित्यादि पौराणिकी कथा सुप्रथिता। सेयं कथा सुस्फुटं वेदमूलेति मनाग्दरमुकुलितलोचनं विचारणे प्रत्यक्षीभवति।

विष्णोः स्वरूपं वेदेषु प्रभूताभिर्ऋग्भिः स्पष्टीकृतम्-

**विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि।**
**यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः।**
**( ऋक् 1/154/1 )**

**प्रतद्विष्णवे शूषमेतु मन्म गिरिक्षिते उरुगायाय वृष्णे।**

**य इमं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः।।**
**( 1/154/3 )**

**प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमेषु अधिक्षियन्ति भुवनानि विश्वा।**
**( 1/154/2 )**

अत्र हि त्रिविक्रमस्य विष्णोस्त्रिषु विक्रमेषु सर्वाणि भुवनानि समाविशन्तीत्यादि वामनावतारसन्दृब्धा कथा स्पष्टमभिव्यज्यते। पुराणेषु तु वामनावतारेण स्वकीय-पादक्रमणेन बलेस्त्रिलोक्याः प्रत्यानयनस्य कथा सूच्यते किन्तु सैषा कथा यस्य वैज्ञानिकस्य तथ्यस्य व्यञ्जिका तदद्यात्याधुनिकविज्ञानदृशाऽपि क्षोदक्षमम्। के खल्विमे त्रयो विक्रमाः ? कोऽयं विष्णुः? इति विमर्शः क्रियेत चेत् अत्र हि विष्णुपदेन चराचरनियामकस्य सौरमण्डलाधिपतेः सवितुः तत् स्वरूपं विवक्षितं यत् स्वकीयाभिर्गतिभिः, विक्रमैश्चङ्क्रमणैर्वा कालं नियच्छति। के इमे त्रयो विक्रमाः? सूर्यस्य प्रथमो विक्रमस्त्वस्माभिः प्रतिदिनमवलोक्यते एव येनाहोरात्रं मिमीते सः। सूर्योदयमनु दिनं, सूर्यास्तमनु रात्रिरिति सूर्यस्य प्रथमेन विक्रमेणैव संभवति। अहोरात्रगणनां नियच्छन्नयं विक्रमो रोटेशन rotation इत्यादि पदैराधुनिकभाषास्वपि सुविदितः।

अपरो विक्रमः संवत्सरं मिमीते येनर्तवः संभवन्ति। अनेन द्वादशमासानां गणना संभवति। इयमपि गतिः रिवोल्यूशन Revolution इत्यादिपदैः सुविदिता। इदं त्वत्रावधेयं यद् वस्तुतः सूर्यः स्थिरोऽस्ति, भूरेव स्वकीयस्याक्षस्योपरि घूर्णति, अनेन घूर्णनेनाहोरात्रं प्रत्यक्षीभवति। एवमेव भूरेव सूर्यं परितो भ्राम्यति येन संवत्सरः पूर्यते। सर्वमिदमस्माकमृषिभिः परिज्ञातमासीत् किन्तु भूतलस्थैर्जनैः प्रत्यक्षमुदयन्नस्तमयंश्च सूर्यो दृश्यते इति स्फुटबोधमनुरुन्धानैस्तैः सूर्योदय-सूर्यास्त-सूर्यभ्रमणा-दिपदैर्यथा ता एता घटना आकार्यन्त, आर्यभटादिभिरपि यथा ''विपरीतगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्'' तथैवाचलानि भानि चलानि दृश्यन्ते इति सर्वामपि वैज्ञानिकीं स्थितिं स्पष्टीकृत्य बाला अवाबोध्यन्त, तथैव देवशास्त्रीयेषु वर्णनेष्वपि ''सविता रथेन यात्यायाति'' चेत्यादि ब्रुवाणैस्तैरिमे विभिन्ना विक्रमाः (येऽद्य 'गतय' इत्युच्यन्ते) विष्णोः (सवितुः) प्रसेधिताः न तु भुवः। विक्रमद्वय-मिदमहोरात्र-संवत्सर-नियामकं भवति, तृतीयो विक्रमः कल्पस्य नियामको भवति। यथा आधुनिक-विज्ञानानुसारं भूः सूर्यं परितो भ्राम्यति तथा प्रागिदं ज्ञायते स्म यत् सौरमण्डलमपि परमेष्ठिमंडलं परितो भ्राम्यति। तदिदं भ्रमणं त्रिंशत्कोटिवर्षैः पूर्यते। परमेष्ठिमण्डलमपि स्वयम्भू-मण्डलं परितो भ्राम्यतीत्यादि तु कथान्तरम्। आधुनिकैर्वैज्ञानिकैरपि सर्वमिदमभ्युपगम्यते यद् भुवोऽक्षभ्रमणं (Rotation), परिभ्रमणं (Revolution) च यथा सर्वैः प्रत्यक्षीक्रियते तथा मन्वन्तराणां कल्पानां चापि परिगणना सौरमण्डलपरिभ्रमणेन पूर्यते इति।

एते एव त्रयो विक्रमास्त्रिविक्रमस्य विष्णोराख्याता वेदेषु। सूर्योऽयमुच्चतरं द्युगतं ''सधस्थं संकुलं'' स्कभ्नाति नियन्त्रयति। सूर्यगता याऽऽकर्षणशक्तिरस्ति तया सौरमण्डलं ध्रियते इति वैज्ञानिकानां स्थापना। तदेव वेदेषु बहुविधै रूपकैः स्फुटीकृतम्। ये तु विष्णोर्विक्रमत्रयं सूर्यस्योदयः प्रकाशोऽस्तगमनं चेत्येवास्तीति बालबोधोचितं रूपकं व्याचक्षते, तेऽतिसारल्यवादिनः कथमभ्युपगम्या इत्यत्र प्रमाणं विद्वांस एव। वेदेषु तु –

**''अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानो अवपद्यते न।**
**कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम्।।''**

इत्यादि मन्त्रा अस्यैव तथ्यस्य स्फोरका यत् सूर्ये काचन विशिष्टा शक्तिरस्ति। सूर्यस्येयमाकर्षणशक्तिरेव विष्णुपद-वाच्येति बहूनामृषीणां स्थापनाऽभूत्। एवंविधानां तथ्यानां स्फोरणं वेदवाचस्पति पं.मधुसूदन ओझा म.म.पं. गिरिधरशर्मचतुर्वेदादिभिरपि समये-समये विहितम्। सन्त्यत्र बहूनि प्रमाणनि। ''स्कम्भो दाधार पृथिवी'' मित्याद्यथर्वणि पठयते। तैत्तिरीयारण्यके वत्सनामकेन ऋषिणा स्पष्टीकृत-मुल्लिख्यते-

''अनवर्णे इमे भूमी इयं चासौ च रोदसी। किं-स्विदत्रान्तराभूतं येनेमे विधृते उभे। विष्णुना विधृते भूमी इति वत्सस्य वेदना।।'' (तै. आरण्यक 1/8/4) भूमिर्द्यौश्च विष्णुरूपया विधरणशक्त्या धृते इत्यादि वत्सस्य स्थापना।

इदमपि स्पष्टीकृतमस्ति ''यदिन्द्राविष्णू'' पदेन ये प्राणा विवक्षितास्ते वस्तुत आधरणं विधरणं च कुर्वाणौ द्वौ प्राणभेदौ स्तः। विष्णुर्विष्टम्भकोऽस्ति। अनेन विभिन्नानां दिवि स्थितानां पिण्डानां धारणं क्रियते अन्यथा तेऽवपद्येरन्, स्खलेयुः। विष्णोरिदं कृत्यमिति बहुत्र वेदेषु स्पष्टीकृतमेव। एकत्र हृदयावर्जकशैल्या ऋषिर्वक्ति– अचिकित्वाँश्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मने न विद्वान्, **वि यस्तस्तम्भ षडिमा रजांसि अजस्य रूपे किमपि स्विदेकम्?** (ऋक् 1/164/6)

अपरत्र प्रश्नस्यास्योत्तरं प्रयच्छति ऋषिः – **यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः। (1/154/1)**

इत्थं विष्णुरभिकेन्द्रकं बलं यदांग्लभाषायां Centripetal इत्युच्यते, इन्द्रश्चापकेन्द्रकं बलं यत् Centripetal इत्युच्यते। सर्वमिदं वेदेषु रूपकविधया-ऽभिव्यञ्जितं बहुत्र– **उभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्च नैनोः। इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्।** इदं हि ऐन्द्रावैष्णवं सूक्तं विज्ञानविदो भरद्वाजस्य विकर्षणाकर्षणस्पर्धारूपकेण ब्रह्माण्डीयरहस्यस्फोरणीं दृशं प्रमाणयति। (ऋग्वेदस्य षष्ठे मण्डले ऊनसप्ततितममिदं सूक्तम्।)

इदमेव रहस्यमासीदिन्द्रशब्दस्य, उपेन्द्रशब्दस्य च। इन्द्रः केन्द्राद् बहिरभितः प्राणान् प्रक्षिपति, उपेन्द्रो विष्णुः केन्द्रं प्रति तानानयति। इयमेव आकर्षणशक्तिः (Gravitation) यत् केन्द्रं प्रति, गर्भकेन्द्रबिन्दुं प्रति सर्वं बलं धावति। विकर्षणशक्तिः केन्द्रात् परतः, उपरि, अभितः प्रक्षिपति। अतो विकर्षणमिन्द्रेण, आकर्षणमुपेन्द्रेण विष्णुना क्रियते। स एव विष्टंभकः स एव स्कंभः, स स्कभ्नाति। विष्णोरिदं वैज्ञानिकं स्वरूपं परस्तात् पुराणकथाभी रूपकविधया विभिन्नैः प्रकारैरुपावर्णि। वामनावतारकथा तादृशेषु रूपकेष्वेकतमाऽस्ति। अत्रातिसंक्षेपेण दिङ्मात्रं संकेतितमस्माभिः।

विष्णोर्गोलोकः, कृष्णमालम्ब्य माधुर्यलक्षणा भक्तिः, मधुपुरी तदावासरूपा इत्यादेरुत्सोऽपि वेदे द्रष्टुं शक्यः। जानीम एव वयं यत्–

**ता रां वास्तून्युष्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्रा ह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि।** (1/154/6) इत्यादिवाग्भ्यो भक्तिमार्गीयैराचार्यै रश्मिवाचकेन गोपदेन गोलोकस्य संकेतो गृहीतः, तस्य च परमधामरूपेण वर्णनं, तत्र मधुरमयस्योत्सस्योल्लेखः ततश्च वृष्णः पदेन विष्णोः शक्तेः प्रत्यायनं गिरिक्षित उरुगायाय वृष्णे इत्यादि बहुत्र प्रयुक्तं वृष्णः वृष्णे इत्यादि पदजातं यद् वृष्णिवंशस्यापि केनचन प्रकारेणोत्सतां संकेतयति, यद्यपि शक्तिमतोऽर्थे ''वृषा'' पदस्य सुप्रथित एव प्रयोगः। सर्वमिदमुपलक्ष्य च पौराणिको विष्णुभक्तिविस्तरः समुपन्यस्तः स्यात्। ''विष्णोः पदे परमे मध्व उत्सः'' (1/154/5) इत्यादिमन्त्रैर्विष्णोर्धाम्नि मधूनामुत्सो वर्णित, एवं वेदेषु गिरिक्षिते इत्यादिपदेषु गोवर्धनधारणं निहितम्।

त्रिदेवपरिकल्पनायां ब्रह्मणः सृष्टिकारकत्वं, विष्णोः पालकत्वं चापि वेदमूलकम्।''एको दाधार भुवनानि विश्वा'' इत्यादि सर्वत्र विष्णुमधिकृत्यैवोक्तम्। प्रजापतिना क्लृप्तायाः सृष्टेः क्रमो विष्णुना व्यवस्थापितस्तमेव चाभ्युपगम्य यज्ञादिकं प्रवर्तते, सर्वे लोकास्तमेवाभ्युपजीवन्ति, यजमानश्छन्दोभिस्तं स्तौति, तं प्राप्नोति चेत्यादि सुप्रथितमेव। ''यज्ञो वै विष्णुः'' सृष्टिमूलकत्वं यज्ञस्य सर्वैरभ्युपगम्यत एव। कृष्णयजुर्वेदस्य यज्ञोपयोज्यत्वं सुविदितम्। तत्रापि सर्वमिदं स्पष्टीक्रियते एभिः शब्दैः–

''विष्णुमुखा वै देवाश्छन्दोभिरिमांल्लोकान् अनपजय्य-मभ्यजयन् यद् विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमांल्लोकाननपजय्यमभिजयति। विष्णोः क्रमोऽस्याभिमाति हेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशः। छन्दोभिरेवेमांल्लोकान् यथापूर्व-मभिजयति।'' (तैत्तिरीय संहिता 1/7/5/4/5)

सर्वेयं जागती व्यवस्था विष्णूपज्ञाऽस्तीत्यस्यैव निदर्शनभूतोऽस्त्यस्माकं स सङ्कल्पो यः प्रतिधार्मिककृत्यं पुरोहितैर्यजमानमुखादुच्चार्यते– ॐ विष्णुर्विष्णुर्विष्णुः। श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीये परार्धे श्वेतवाराहकल्पे वैवस्वते मन्वन्तरे इत्यादि।

सर्वमिदं वेदेषु विज्ञानं गवेषमाणैर्विद्वद्भिरभ्युपगतं, वेदेष्वध्यात्मविद्यां गवेषमाणैरपि। अद्य ह्यध्यात्मिकपदम-स्माभिः स्पिरिच्युअल (Spiritual) पदस्य पर्यायत्वेन प्रयुज्यते यद्यपि वेदेष्वध्यात्मपदं कस्मिंश्चिद् विभिन्नेऽर्थे प्रयुज्यते। तत्र हि अधिभूतम् अधिदैवम् अधियज्ञम् इत्याद्यभिव्यक्तयो यथा जगतः देवतानां, यज्ञस्य चार्थं विवक्षमाणैः प्रयुज्यन्ते तथा अध्यात्मम् इति पदं प्रातिस्विकम् व्यक्तिगतम्, व्यष्टिगतम्, स्वकीयम्, स्वशरीरपर्याप्तम् इत्यादिष्वर्थेषु प्रयुज्यते। अत एव यास्केन परोक्षकृताः, प्रत्यक्षकृता, आध्यात्मिकाश्चेति त्रिविधा ऋचो व्याख्याताः। न हि तत्र दार्शनिकोपज्ञोऽर्थो विक्षितः। स ह्युपनिषत्काल-मतिव्याप्य प्रसृतः। ''आधिभौतिक'' आधिवैदिक, आध्यात्मिक इति प्रवर्गत्रयेण आत्मविद्यासंबन्धि 'आध्यात्मिक' मित्यर्थः परवर्तिनि काले प्रासरद्योऽद्यापि जागर्ति। अस्तु, प्रसंगवशादुपसृतमिदमत्र स्पष्टीकरणाय निवेदितम्।

वाङ्गीयैर्विद्वद्भिः प्रायशो वेदेषु सैवाऽऽत्मविद्या-ऽवलोकिता। महर्षिररविन्दोऽध्यात्मविद्याया मूर्धन्यः प्रवक्ता, मनीषी, कविवर्यो, बहुभाषाविद् विवेचकश्चाऽऽसीत्। तेन वेदेषु तादृशान्याध्यात्मिकरहस्यानि गवेषितानि विवृतानि च। अन्यैर्वाङ्गैर्विद्वद्भिर्विज्ञानशब्देन विविधचिन्तनं विवक्षद्भिर्वेदेषु नूतनानि तत्त्वान्याविष्कृतानि। एवंविधेषु मन्मथनाथपूर्वनामा श्रीमान् प्रत्यगात्मानन्दः सरस्वती प्रमुखोऽस्ति। येन वाङ्गभाषायां ''वेद ओर विज्ञान'' (वेदाश्च विज्ञानं च) शीर्षको ग्रन्थो व्यलेखि। अत्र तेन विष्णुमधिकृत्य यद् विवेचितं तत् स्वकीयया नवोन्मेषशालिन्या प्रतिभयाऽऽ-विष्कृतम्। अत्रापि स तादृशीमेव काञ्चन शक्तिं विष्णुगतां मनुते। स खलु विष्णुदेवतामग्निरूपां व्याचक्षाणस्तां विश्वस्य विधारिणीं विद्युच्चुम्बकीयशक्तिसदृशीं काञ्चन शक्तिं प्रतिपादयति Electro-magnetic Force सैव शक्तिर्विश्वं धारयति। ब्रह्माण्डगतेषु पिण्डेषु यदनुशासनं त्तस्या एव शक्तेः कृत्यम्। तदेव परमं तत्त्वम्, तदेव परस्मं धाम। तदिदं रहस्यं प्रतीकविधया विविधरूपकैर्वेदेषु निहितमिति विदुषोऽस्य स्थापना। सेयं स्थापनाऽप्यस्माकं प्रागुक्तानि तथ्यान्येव सत्यापयति। सेयं शक्तिरेव सृष्टेः प्रतिपालिका। अतस्त्रिदेव-समष्टौ विष्णोः पालकत्वं यदाख्यायते तदनेन सत्याप्यत इत्यादि स्फुटम्।

अनेन विवरणेन तदिदं स्पष्टीभवति यत् ''सर्वं वेदात् प्रसिध्यति'' इत्युक्तिं चरितार्थयद्भिर्भक्तिमार्गीयैराचार्य-वर्यैर्यथा वेदोक्तं विष्णुस्वरूपं वेदशब्दानेवाऽऽदाय परमे धाम्नि स्थितस्य, गोलोकाधिपतेः गोवर्धनधारिणः, माधुर्यलक्षणाया भक्तेरालम्बनभूतस्य करुणावरुणालयस्य ''भगवतः'' स्वरूपत्वेन व्याख्यातं, तथैव विज्ञानादिभिः शोधविद्वद्भिस्तद् ब्रह्माण्डनियामिकाया विधरणशक्तेः, पालिकाया, अनुशासनतन्त्ररूपायाः शक्तेश्च स्वरूपत्वेन व्याख्यातं यदाधुनिकविज्ञानविदुषां मान्यतानां मूलमपि स्पष्टीकरोति। इयमेव वेदस्य वेदता।

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।**

भक्तिमार्गे तु भक्तजनानामभिनिवेशो गते शताब्दी-नवकेऽस्माभिरवलोकित एव, विज्ञानेऽपि पाश्चात्यज्ञानशाखा-प्रतिफलनानन्तरं सविशेषमभिनिवेशोऽभूच्छिक्षितजनानाम्। तस्य विज्ञानस्य यद्विवक्षितं, तस्यापि मूलं वेदेषु द्रष्टुं शक्यते इति ये व्याचक्षते तेऽपि न सन्ति मूढाः। प्रत्युत विना तेन विज्ञानपरकव्याख्यानेन ''इन्द्राविष्णू'' इत्यादिदेवद्वन्द्व-परिकल्पना न कथमप्यवगन्तुं शक्या स्यात्। अस्य-वामीयादिसूक्तेषु, नासदीयादिसूक्तेषु वा यत् किञ्चिद् रहस्यं गर्भितं प्रतीयते, न तदभिधयाऽवगन्तुं शक्यम्। 'परोक्षप्रिया ह वै देवाः प्रत्यक्षद्विषः' इति स्फुटं तत्र रूपकात्मकं किञ्चिद्र-हस्यं गर्भितं प्रमाणयति। तादृशानां रहस्यानां मनागवगमा-यैतादृशानि विवेचनप्रयतनानि प्राथमिकपदन्यास-रूपेण मनीषिणां कृपादृष्टिमभिकांक्षता मया सङ्केतरूपेणाऽत्र प्रस्तुतानि।

**(प्रधानसम्पादकः ''भारती'' संस्कृत मासिकस्य भूतपूर्वाऽध्यक्षः, राजस्थान संस्कृतअकादम्याः, ज.रा. राजस्थान संस्कृतविश्वविद्यालयीयाधुनिक संस्कृतपीठस्य च, निदेशकश्च संस्कृतशिक्षा-भाषाविभागयोः, राजस्थानसर्वकारीययोः)**
**सी-8 पृथ्वीराज रोड, सी-स्कीम, जयपुर**

पंचत्रिंशः प्रसङ्गः

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

# एकनिष्ठाः कार्यकर्त्तारः

❑ वेणीमाधव गो. धर्माधिकारी

## बौद्धिकः प्रकाशः

नागपुरस्थाः कृष्णराव मोहरिरमहोदयाः स्वानुभवं वर्णयन्ति-बाबामहोदयैः सामान्येन त्वहम् 1926 वर्षत एव परिचित आसम्, परमपूजनीयानां द्राक्तरहेडगेवारमहोदयानां गृहे एव तेषां प्रथमदर्शनमभूत्। तस्मिन् समये द्राक्तरमहोदयानां गृहे श्रीमन्तो नानाभिशीकराः, श्रीरामपाध्ये महोदयाः श्रीहरिभाव लेले महोदयाः एतेषां सर्वदैव मिलनं भवतिस्म। तस्मिन्नेव सुहृन्मण्डले मया बाबामहोदयाः प्रथमवारमवलोकिताः। तस्मिन् समये ते सीताबर्डीस्थाने निवसन्तिस्म। परं तेषां विशिष्टः परिचयः 1927 वर्षीयस्य प्रथमे शिक्षावर्गे संजातः।

संघस्य स्थापनानन्तरं कार्यकर्त्तॄन् शीघ्रं प्रशिक्षितान् कर्त्तुम् 1927 वर्षे जनवरीफर्वरीमासयोर्मध्ये एको दीर्घकालीनः प्रशिक्षणवर्गः समायोजित आसीत्। वर्षत्रयात्मकं प्रशिक्षणमेकस्मिन्नेव वर्षे पूर्णं कर्त्तुं वर्गोऽयं सार्द्धद्विमासं यावत् प्रचलितः। बाबामहोदयास्तस्मिन् सम्मिलिता आसन् परं शिक्षार्थिरूपेण नैव वर्गस्य बौद्धिकप्रमुखरूपेण। तस्मिन् समये बौद्धिकप्रमुखपदं नासीत् परं तत्कार्यस्य सम्पूर्णं दायित्वं तेभ्यः समर्पितमासीत्। ते सर्वदैव कस्यापि कस्यापि विषये द्राक्तरमहोदयैश्चर्चां कुर्वाणा अवलोक्यन्तेस्म। ते स्वयंसेवकानामधिवेशनमपि गृह्णन्ति। तदाप्रभृत्येव बौद्धिकविभागस्य बाबामहोदयस्य च परस्परं सम्बन्धस्य छविरस्मासु अज्ञातरूपेणाङ्किता। संघशिक्षावर्गे परीक्षणाभावेऽपि द्राक्तरमहोदयैः सर्वेभ्यः वर्गे सम्मिलितेभ्यः शिक्षणोपाधिः प्रदत्ता। एवमेव प्रारम्भत एव बाबामहोदयानां बौद्धिकः प्रकाशः संघे विकसितः।

तस्मिन् समये आप्टे-बर्वेमहाभागयोः युगला युतिः सर्वत्र संघे सुपरिचितासीत्। द्राक्तरमहोदयाः कथयन्त आसन् एतौ न सामान्यजनौ देवलोकादवतरितौ गन्धर्वाविव। बाबामहोदयानां विषये तु कथनमिदं शतप्रतिशतं सत्यं भासते स्म। कारणं बाबामहोदयाः कदापि स्वनिजजीवनस्य गाथाः नैव प्रकटयन्तिस्म। तेऽत्यन्तं कठोरतापूर्वकं निजं जीवनं गोपयन्ति स्म। तेषां मातृ-पित्रोरितिवृत्तं तस्य जन्मनाम तज्जन्मसमयादिकस्य ज्ञानं न कोऽपि जानाति स्म। अत एव प्रचलितमासीत्तौ इन्द्रलोस्य गन्धर्वाविव।

एवं तु आप्टेमहोदयानां नाम उमाकान्तकेशव आप्टे इत्यासीत्। तेभ्यो ''बाबासाहेब'' इत्युपाधिः द्राक्तरमहोदयैरेव प्रदत्तासीत्। प्रारंभे वयं तान् आप्टे इतिनाम्नैव आह्वयन्त आस्म। विचाराणां गाम्भीर्येण, बौद्धिकप्रतिभया, दर्शने च प्रौढता तेष्वासीत्। अत एव आप्टे इति नाम्ना आह्वानं अभद्रमिव भासतेस्म। एकदा वयं विचारगोष्ठावुपविष्टाः, तदा द्राक्तरमहोदयैरुक्तं तान् आप्टेमात्रनाम्ना आह्वानं नोचितम्। तेतु बाबौमहोदयाः सन्ति। तदा प्रभृत्येव ते बाबासाहेब आप्टे संजाताः। महाराष्ट्रभाषायां बाबासम्बोधनं वयसा प्रतिभया च वृद्धानां कृते क्रियते। अत एवास्मभ्यमपि तद्रुचिकरमभूत्।

मम मातापितरावपि तेभ्यः स्निह्यन्तिस्म। ते प्रत्युत्सवदिने ब्राह्मणत्वेन भोजनार्थं निमन्त्रिताः भवन्तिस्म। केचन पर्वदिवसाः यथा अक्षयतृतीया, सर्वपित्र्यमावास्यादयः येषु गृहस्थ एव ब्राह्मणत्वेन निमन्त्रितो भवति परं बाबामहोदयाः नियमस्यास्यापवादरूपा आसन्। कोऽपि पर्वदिवसो भवेत्तेऽवश्यं निमन्त्रिता भवन्तिस्म।

## आंग्लभाषायां प्रभुत्वम्।

वार्त्तेयं 1930 वर्षस्यास्ति। अहं तदा महाविद्यालयस्य प्रथमवर्षस्य छात्र आसम्। हिस्लायमहाविद्यालये पठन्नासम्। संघस्थानस्य समीपे एवं संघकार्यालयो लाभदायको भविष्यति। एवं विचार्य तेषु दिवसेषु श्रीमतां वंशीलालदशोत्तरमहोदयानां गृहे एवं कार्यालयः स्थापितः। एवं संघस्यायं प्रथमः कार्यालयः आसीत्। गृहमिदं कार्यालयस्योपयोगार्थमेव मम नाम्ना विंशति-रूप्यकप्रतिमासं भाटके गृहीतम्। भाटकमस्य आप्टेनर्वेमहोदयावेव दास्यत इति निर्णीतम्। तौ कार्यालये एव न्यवसताम्। तस्मिन् समये अहमपि कार्यालये न्यवसम्। द्राक्तरमहोदयाः अत्रागच्छन्ति-

स्म, अस्माभिः स्वयं-सेवकैश्च सह वार्त्तालापं कुर्वन्तस्ते रात्रावत्रैव स्वपन्तिस्म। एवं च कार्यालयोऽयं संघकार्यगति-विधीनां प्रमुखं केन्द्रमभवत्।

एकस्मिन् दिने यदाहं स्वाध्यायाभ्यसनं कुर्वन्नासम् तदैव द्राक्तरमहोदयाः कार्यालये समागताः। तस्मिन् समयेऽहं बाबामहोदया एव च कक्षे आस्ताम्। द्राक्तरमहोदयाः मामवदन् ''कृष्ण त्वं किञ्चित्कालार्थं बहिश्चल''। अहमवदम् अद्य महाविद्यालये गमनात्पूर्वमपठितपाठोऽयं समाधेयः महाविद्यालये च नेयः। तेषु दिवसेषु महाविद्यालये ''गार्डनर'' महोदयाः अध्यक्षा आसन्। त एवांग्लभाषां पाठयन्ति स्म। मया तैः प्रदत्तोऽयमपठितपाठः समाधा-यावश्यमेव नेय आसीत्। द्राक्तरमहोदयाः बाबामहोदयम-वदन्-अहं कस्मैचिदावश्यककार्याय कृष्णं बहिर्नयामि भवान् तस्य अपिठतपाठं तावत्समाधाय स्थापयतु।

द्राक्तरमहोदयैर्निर्दिष्टं प्रत्येकं कार्यं बाबामहोदयाः महत्या आत्मीयतया कुर्वन्ति स्म। तैरपठितपाठोऽयं महत्या सावधानतया समाहितः। अहं परावृत्य कार्यालये समागतः। श्री बाबामहोदयेन यथैव पठितपाठोऽयं समाहितस्तथैव पंजिकायां लिखित्वा महाविद्यालये नीतः। श्रीमतामध्यक्ष-महोदयानामन्तरे च पंजिका प्रस्तुता। श्रीगार्डरमहोदयैः पंजिकावलोकनं कृत्वा मह्यं विंशतिमध्ये सप्तदशगुणाङ्काः प्रदत्ताः। मया कक्षायां प्रथमं स्थानं प्राप्तम्। अस्य लेखस्य गार्डरमहोदयोपरि महान् प्रभावः संजातः। तेषां दृष्टावहं श्रेष्ठो विद्यार्थी संजातः। केचन विद्यार्थिनः सहपाठिनः ये संघस्य विरोधिन आसन् तेष्वपि अस्य प्रभावः संजातः। अस्मिन्नन्तराले एव कक्षाप्रतिनिधीनां निर्वाचनमभूत्, तस्मिन्नप्यहमवचितः। अधुना तु अध्यक्षोऽधिकं प्रभावितः। महाविद्यालये U.T.C. निर्वाचनप्रसङ्गः समायातः सरलमेवाध्यक्षेणान्येषु कतिपयछात्रेषु ममापि निर्वाचनं कृतम्। एवं च विद्यालये प्रवेशानन्तरं क्रमशः प्रगति-सोपानारोहणं मे संजातम्। एतेषां सर्वेषां श्रेयः मम विचारेण बाबामहोदयायैव दातुं शक्यते यतस्तैः समाहितेनापठितपाठेनैवाहं विद्यालयाध्यक्षदृष्टौ सर्वश्रेष्ठश्छात्रः अभवम्। कथनस्या-भिप्रायः बाबामहोदयानामांलभाषायामपि प्रभुत्वामासीत्। एवं तु ते मैट्रिकपरीक्षोत्तीर्णा एवासन् परं स्वज्ञानेन ते स्नातकोत्तरान् छात्रान् पाठयितुं समर्थाः।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** | **द्विषष्टितमः प्रसङ्गः**

# शीलम्

**❑ श्रीमती आराधना धर्माधिकारी**

अस्माकं पार्श्ववर्तिनि गृहे वसतिस्म सुवर्णा बालिका। अतीव सरला सा सरलमेव विद्यालये गच्छतिस्म न क्वापि इतस्ततः। गृहाद् विद्यालये विद्यालयाद् गृहम्। पाठ्यपुस्तकान्येव तस्याः, सख्यः, तैरेव तस्याः दृढं सौहार्दम्। उभयोरनुकूलतासीत्। सुसंगतेरेव फलं यत्सा प्रथमप्रयासेनैव कोषसंचयकार्यालयस्य (बैंकस्य) प्रवेशपरीक्षायां प्रथम-श्रेण्यामुत्तीर्णा अभवत्। उन्नतवेतनशृंखलायां कोषसंचयालये सा अधिकारीपदे नियुक्ता। कोषसंचयालयस्य शाखा-कार्यालयः दूरे आसीदतः स्कूटीयानेनागमनमारब्धम्। कार्यालयस्य व्यवस्थापको युवा अविवाहितश्चासीत्। उभावपि परस्परं प्रभावितौ विवाहबन्धने च सुबद्धौ। श्वशुरालये श्वश्रूः नासीत्। षष्टिवर्षादुपरि वयस्कः श्वशुरः एकाक्येव स्वस्यैक-मात्रेण पुत्रेण सह निवसतिस्म। पुत्र एव तस्य कृते जगत्। विवाहस्याशीर्वादसमारोहे आवामपि सम्मिलितौ बभूव।

एकस्मिन् दिने मे पतिरवदत्-उभावेकस्मिन् दिने भोजनार्थं निमन्त्रयाव, रुचिकरं भविष्यति। पत्युर्मिलनमपि-भविष्यति। चलदूरभाषयन्त्रस्याङ्कः आसीत्। पतिः सुवर्णां न्यमन्त्रयत्। सुवर्णा प्रसन्ना अभवत् परं किञ्चिद् विचार्य पुनरवदत्- नहि नहि मातः भोजनं त्यजतु। श्वशुरमहोदयः ह्यः एव ग्रामात्परावृत्यागतः। तानेकाकिनस्त्यक्त्वा गमनं नोचितं भविष्यति। यद्यपि ते न किमपि कथयिष्यन्ति।

ते यावद्दिनमेकाकिन एव गृहे तिष्ठन्ति। सायं समयः आवां तैः सह व्यत्यापयाव। अस्मिन् वयसि विशेषतः श्वश्रु-भावे तान् त्यक्त्वा गमनं नोचितं भासते। मां क्षमस्व नान्यथा विचारणीयम्।

अस्मभ्यं तद् रुचिकरमभवत्। सुवर्णा यथा सुशीला बालिकासीत् तथैव सुशीला वधूः अप्यस्ति। या श्वशुरस्यैकाकित्वं विचारयति।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी जीवनवृत्तमाला

❑ अविनाश शर्मा

# भारतभूम्याः नगराणि

(गताङ्कादग्रे-)

**काञ्ची** - सप्तमोक्षपुरीषु काञ्ची दक्षिणभारतस्य मोक्षपुरी अस्ति। अतिप्राचीनकालात् इयं काञ्चीपुरी शैव-वैष्णव-जैन-बौद्ध-सम्प्रदायानुयायिनां प्रसिद्धं तीर्थक्षेत्रं तथा विद्यापीठम् अस्ति। अस्या नगर्याः शिवकाञ्ची विष्णुकाञ्ची नामकौ द्वौ विभागौ स्तः। भगवता शङ्कराचार्येण संस्थापितं कामाक्ष्याः विख्यातं मन्दिरमस्ति। अस्यैव मन्दिरस्य कारणात् काञ्चीवरम् एकं शक्तिपीठं मन्यते। अपरं प्रसिद्धमंदिरं काञ्च्यां एकाम्बरनाथस्यास्ति। अस्य मन्दिरस्य गोपुरं प्रायः 63 गजपरिमितम् (188 फुट) समुन्नतमस्ति। अस्य सभामण्डपस्य मध्ये एकसहस्रं स्तम्भाः सन्ति। अत्र शिवलिङ्गस्य दुग्धेनाभिषेकः क्रियते। काञ्चीमध्ये अष्टोत्तरशतशिवस्य स्थानानि सन्ति।

विष्णुकाञ्चीमध्ये अष्टादशसंख्यकानि विष्णुस्थलानि सन्ति। वैष्णवानां कृते भगवतः वरदराजस्य मन्दिरं सर्वश्रेष्ठमस्ति विष्णुकाञ्ची ब्रह्मदेवस्य तपोभूमिः कथ्यते। एतदतिरिक्तं काञ्चीमध्ये एकसहस्रं गणेशस्थलानि सन्ति। एतेषां निर्माणं चोलराजवंशेन कृतमासीत्। चीनदेशीय-यात्रिणा युवांगच्यांगेन अत्र शतसंख्याका बौद्धसंघारामाः दृष्टाः। बौद्धपण्डितेषु नागार्जुनः, बुद्धघोषः, धर्मपालः, दिङ्नागः इत्यादीनां महापण्डितानां निवासस्थलं काञ्चीमध्ये एवासीत्। बौद्धजैनसम्प्रदाययोः प्रचारा-रम्भात् प्राक् काञ्चीमध्ये घटिकानामकाः प्रसिद्धाः वेदशालाः आसन्, यत्र कदम्बवंशस्य मयूरवर्मसदृशः महाराजः वेदाध्ययनं कृतवान्। पल्लववंशीयाः राजानः एभ्यः वेदविद्यालयेभ्यः प्रतिवर्षं विपुलं धनराशिं प्रदत्तवन्तः आसन्। काञ्चीविद्यापीठं निखिले भारतवर्षे प्रसिद्धम् आसीत्। ब्रह्माण्डपुराणे कथितं यत् काशी काञ्ची च भगवतः शिवस्य नेत्रे स्तः।

**अवन्तिका**- इयं नगरी उज्जयिनीति नाम्ना प्रसिद्धाऽस्ति। पुराणानुसारं अस्मिन्नेव स्थाने भगवता शङ्करेण त्रिपुरासुरस्योपरि विजयो लब्धः।अनेनैव कारणेन इयं पुरी उज्जयिनीति नाम प्राप्तवती। उज्जयिनी एका मोक्षपुरी मन्यते। भगवतः शिवस्य द्वादशज्योतिर्लिङ्गेषु महाकालनामकस्य शिवलिङ्गस्य इदं पीठमस्ति। भगवत्या सतीदेव्याः बाह्वोः एकांशोऽत्र पतित आसीत्। अतः इयं पुरी एकं शक्तिपीठमपि अस्ति।

**आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम्।**
**मृत्युलोके महाकालं लिङ्गत्रय नमोस्तु ते।।**

अस्य पौराणिकवचनस्यानुसारेण आकाशे तारकम्, पाताले हाटकम् मृत्युलोके च महाकालनामकं शिवलिङ्गं वन्दनीयमस्ति। शिवपुराणे महाकालस्य माहात्म्यं वर्णयन्त्यो अनेकाः अद्भुता कथाः सन्ति। एतदतिरिक्तं हरसिद्धिमन्दिरं, सान्दीपनेराश्रमः (यत्र भगवान् श्रीकृष्णः विद्याध्ययनं कृतवान्) चित्रगुप्तमंदिरम् भर्तृहरिगुहा, सिद्धवटेत्यादीनि प्राचीनस्थानानि उज्जयिन्यां दर्शनीयानि सन्ति सिद्धवटवृक्षः क्षिप्रानद्यास्तटे अनादिकालात् विद्यमानोऽस्ति। अस्य वृक्षस्य निर्मूलनं कर्तुं जहांगीरेण तथा अन्यान्यैः मुहम्मदीयशासकैः प्रयत्नाः कृताः किन्तु अयं सिद्धवटवृक्षः यथापूर्वं स्वस्थाने विराजमानोऽस्ति। भारतीयज्योतिषशास्त्रानुसारं भूमध्यरेखाया शून्यरेखांश-स्य च केन्द्रबिन्दुः अस्या नगर्याः स्थाने मिलितोऽस्ति। महाकालस्य शिवलिङ्गम् अस्य केन्द्रबिन्दोः द्योतकं मन्यन्ते विद्वांसः। अनेनैव कारणेन महाराणाजयसिंहेन अत्र वेधशालायाः निर्माणं कारितमासीत्। प्रत्येकं द्वादशवर्ष-व्यतीतानन्तरं यदा गुरुः वृश्चिकराशिं प्रविशति तदा अवन्तिकानगरीमध्ये कुम्भपर्व आगच्छति।

इतिहासानुसारं मौर्यशासनकाले मालवप्रदेशस्य राजधानी उज्जयिनी आसीत्। अस्मिन् सुराष्ट्रस्य

लाटाभिधस्य अर्थात् आधुनिकगुर्जरप्रदेशस्य सिन्धस्य कोंकणप्रदेशस्य समावेश आसीत्। सम्राजोऽशोकस्य पुत्रेण महेन्द्रेण कन्यया संघमित्रया च अस्यामेव नगर्यां प्रव्रज्याग्रहणं कृतमासीत्। मौर्यशासनस्यानन्तरं गन्धर्वसेन-राजवंशस्य आधिपत्यम् अत्र आसीत्। तदनन्तरं शकानाम् आधिपत्यम् अत्र स्थापितमभूत्। विक्रमादित्येन शकान् पराजित्य उज्जयिनी पारतन्त्र्यात् मोचितासीत्। प्रथमायां शताब्द्यां शकैः पुनः उज्जयिनी स्वायत्तीकृतासीत् तृतीयशताब्दीपर्यन्तं शकानाम् अत्र आधिपत्यमासीत्। चतुर्थ्यां शताब्द्यां गुप्तसम्राजा चन्द्रगुप्तविक्रमादित्येन शकाः पराजिताः निष्कासिताश्च। तस्मात् कालादारभ्य उज्जयिनी विद्यायाः कलानां च केन्द्रस्थानमस्ति। कालिदासः, मेण्ठः, अमरसिंहः, वररुचिः, भर्तृहरिः भारवीत्यादीनां प्राचीनभारतस्य श्रेष्ठकवीनां अवन्तिका-नगरीस्थः सम्बन्धः वर्ण्यते विद्वद्भिः। महाकविना कालिदासेन स्वनिर्मितेषु मनोहरकाव्येषु उज्जयिन्याः वर्णनम् अतीवात्मीयतया कृतमस्ति।

**द्वारावती**- सौराष्ट्रस्य पश्चिमे समुद्रतटे स्थिता द्वारावती पुरी 'द्वारकापुरी' ति नाम्ना भारतवर्षे प्रख्यातास्ति। इयमेव नगरी भगवतः श्रीकृष्णस्य पाटनगरी आसीत्। पुराणानुसारं अस्मिन्नेव स्थाने रैवतनामकेन राज्ञा दर्भानास्तीर्य यज्ञः कृतः। अतः अयं भूमिः 'कुशस्थली' इति नाम प्राप्तवती। अत्रैव स्थले कुशनामकस्य राक्षस्य वधः कृत आसीत्। द्वारकाधीश्वरस्य श्रीरणछोडरायस्य उत्तुङ्गं विशालञ्च मन्दिरं द्वारकायां विशेषेण दर्शनीयमस्ति। निष्पापकुण्डम्, श्रीकृष्णस्य प्रासादः, तथा श्रीकृष्णचन्द्रस्य जीवन-सम्बद्धाः अन्येषां विशिष्टजनानां मूर्तयः यात्रिणां कृते विशेषेण दर्शनीयाः सन्ति। श्रीरणछोडरायस्य मन्दिरे दोधूयमानो धर्मध्वजः संसारे विशालतमो ध्वजः मन्यते जनैः। अस्य मन्दिरस्य सीमान्तर्गतं जगद्गुरुणा श्रीमताद्यशङ्कराचार्येण स्थापितं शारदापीठमस्ति। सप्त-मोक्षपुरीषु तथा चतुर्षु धामसु द्वारावतीपुर्याः गणना भवति।

### हिन्दी में

**काञ्ची** - सात मोक्षपुरियों में काञ्ची दक्षिण भारत की मोक्षपुरी है। अति प्राचीनकाल से यह काञ्चीपुरी शैवों, वैष्णवों, जैन तथा बौद्ध सम्प्रदाय के लोगों का प्रसिद्ध तीर्थक्षेत्र तथा विद्यापीठ है। इस नगर के शिवकाञ्ची तथा विष्णुकाञ्ची यह दो विभाग हैं। शिवकाञ्ची में भगवान् शंकराचार्य द्वरा स्थापित कामाक्षी का विख्यात मन्दिर है। इसी मन्दिर के कारण काञ्चीवरम् एक शक्तिपीठ माना जाता है। दूसरा प्रसिद्ध मन्दिर काञ्ची माना जाता है। दूसरा प्रसिद्ध मन्दिर काञ्ची में एकाम्बरनाथ का है। इस मन्दिर का गोपुर 63 गज (188फुट) ऊंचा है। इसके सभामण्डप में एक हजार स्तम्भ हैं। यहां शिवलिङ्ग का दूध से अभिषेक होता है। काञ्ची में एक सौ आठ शिव के स्थल हैं।

विष्णुकाञ्ची में अठारह विष्णुस्थल हैं। वैष्णवों के लिये भगवान् वरदराज का मंदिर सर्वश्रेष्ठ है। विष्णुकाञ्ची ब्रह्मदेव की तपोभूमि कहलाती है। इसके अतिरिक्त काञ्ची में एक हजार गणेशस्थल हैं। इनका निर्माण चोल राजवंश ने किया था। चीनदेश के यात्री युवांग-च्यांग ने यहां सौ बौद्ध संघाराम देखे थे। बौद्ध पण्डितों में नागार्जुन, बुद्धघोष, धर्मपाल, दिङ्नाग इत्यादि महापण्डितों का निवास काञ्ची में ही था। बौद्ध-जैन सम्प्रदायों के प्रचार के आरम्भ होने से पूर्व काञ्ची में घटिका नामकी प्रसिद्ध वेदशालाऐं थीं जहाँ कदम्बवंश के मयूरवर्मा सदृश महाराज ने वेदाध्ययन किया था। पल्लव वंशीयराजाओं ने इन वेद-विद्यालयों के लिये प्रतिवर्ष विपुल धनराशि दी थी। काञ्ची-विद्यापीठ सम्पूर्ण भारतवर्ष में प्रसिद्ध था। ब्रह्माण्ड पुराण में कहा है कि

काशी और काञ्ची भगवान् शिव के नेत्र हैं।

**अवन्तिका**- यह नगरी उज्जयिनी इस नाम से प्रसिद्ध है। पुराणों के अनुसार इसी स्थान में भगवान् शंकर ने त्रिपुरासुर पर विजय प्राप्त की थी। इसी कारण इसी स्थान को उज्जयिनी नाम प्राप्त हुआ। उज्जयिनी एक मोक्षपुरी मानी जाती है। भगवान् शिव के द्वादश ज्योतिर्लिङ्गों में महाकाल नामक शिवलिङ्ग का यह पीठ है। भगवती सती के बाहु का एकांश यहां गिरा था। इसलिये यह पुरी एक शक्तिपीठ भी है।

**आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम्।**
**मृत्युलोके महाकालं लिङ्गत्रय नमोस्तु ते।।**

इस पौराणिक वचन के अनुसार आकाश में तारक, पाताल में हाटक और मृत्युलोक में महाकाल नामक शिवलिङ्ग वंदनीय है। शिवपुराण में महाकाल का माहात्म्य वर्णन करते हुए अनेक अद्भुत कथाएं हैं। इसके अतिरिक्त हरसिद्धि का मन्दिर, सान्दीपनि आश्रम (जहाँ भगवान् श्रीकृष्ण ने विद्याध्ययन किया) चित्र गुप्त मन्दिर, भर्तृहरिगुहा, सिद्धवट इत्यादि प्राचीन स्थान उज्जयिनी में दर्शनीय हैं। सिद्धवट वृक्ष क्षिप्रानदी के तटपर अनादिकाल से विद्यमान है। इस वृक्ष को निर्मूल करने को जहांगीर तथा अन्य मुस्लिम शासकों ने प्रयत्न किए थे, किन्तु यह सिद्धवटवृक्ष यथापूर्व अपने स्थान पर विराजमान है। भारतीय ज्योतिषशास्त्र के अनुसार भूमध्य रेखा का तथा शून्यरेखांश का केन्द्र बिन्दु इस नगरी के स्थान पर मिलते हैं। विद्वान् महाकाल के शिवलिङ्ग को इस केन्द्र बिन्दु का द्योतक मानते हैं। इसी कारण महाराज जयसिंह ने यहाँ वेधशाला का निर्माण कराया था। प्रत्येक बारहवर्ष व्यतीत होने पर जब गुरु वृश्चिक राशि में प्रवेश करता है तब अवन्तिका नगरी में कुम्भपर्व आता है।

इतिहास के अनुसार मौर्य शासनकाल में मालव प्रदेश की राजधानी उज्जयिनी थी इसमें से सौराष्ट्र का लाटनायक प्रदेश का अर्थात् आधुनिक गुर्जर प्रदेश का, सिन्ध का तथा कोंकण प्रदेश का समावेश था। सम्राट् अशोक के पुत्र महेन्द्र ने तथा कन्या संघमित्रा ने इसी नगरी में प्रव्रज्या ग्रहण किया था। मौर्यशासन के पश्चात् गन्धर्वसेन राजवंश का आधिपत्य यहां था। इसके पश्चात् शकों का आधिपत्य यहां हुआ। विक्रमादित्य ने शकों को पराजित करके उज्जयिनी को पारतंत्र्य से मुक्त किया था। प्रथम शताब्दी में शकों ने पुनः उज्जयिनी को अपने अधिकार में कर लिया था। तीसरी शताब्दी तक शकों का यहां आधिपत्य था। चौथी शताब्दी में गुप्त सम्राट् चन्द्रगुप्त विक्रमादित्य ने शकों को पराजित किया और भगा दिया। उस समय से उज्जयिनी विद्या का और कला का केन्द्र स्थान है। कालीदास, मेण्ठ, अमरसिंह, वररुचि, भर्तृहरि, भारवि इत्यादि प्राचीन भारत के श्रेष्ठकवियों का अवन्ती नगरी के साथ का सम्बन्ध विद्वानों के द्वारा वर्णित है। महाकवि कालिदास ने अपने निर्मित मनोहर काव्यों में उज्जयिनी का वर्णन अत्यन्त आत्मीयता से किया है।

**द्वारावती**- सौराष्ट्र के पश्चिम समुद्रतट पर स्थित द्वारावती पुरी द्वारकापुरी इस नाम से भारतवर्ष में प्रख्यात है। यही नगरी भगवान् श्रीकृष्ण की पाटनगरी थी। पुराणों के अनुसार इसी स्थान पर रैवतक नामक राजा ने दर्भ बिछाकर यज्ञ किया था। इसलिये यह भूमि कुशस्थली इस नामवाली कहलाई। इसी स्थान पर कुशनामक राक्षस का वध किया था। द्वारकाधीश्वर श्रीरणछोडराय का उत्तुङ्ग और विशाल मन्दिर द्वारका का विशेष दर्शनीय है। निष्पापकुण्ड, श्रीकृष्ण का महल, तथा श्रीकृष्णचन्द्र के जीवन से सम्बन्धित अन्य विशिष्ट लोगों की मूर्तियां यात्रियों के लिये विशेष दर्शनीय है। श्री रणछोडराय के मंदिर में लहराता हुआ धर्मध्वज संसार में सब से विशाल ध्वज माना जाता है। इस मन्दिर की सीमा के अन्दर जगद्गुरु श्रीमद् आद्यशंकराचार्य द्वारा स्थापित शारदामठ है। सप्त मोक्ष पुरियों में तथा चार धामों में द्वारावती पुरी की गणना होती है।

**किशनपोलबाजारः, जयपुरम्**

# विभिन्नगृह्यसूत्राणां प्रतिपाद्यविषयः

❑ कैलाश चन्द्र बुनकर

श्रौतसूत्राणि मुख्यरूपेण त्रिभिः श्रौताग्निभिः पुरोहितवर्गेण सम्पद्यमानकर्मणाम् उल्लेखं कुर्वन्ति। गृह्यसूत्राणि गृह्याग्नेः जायापतिभ्यां क्रियमाणानां यज्ञसंस्काराणां गृहस्थाश्रमस्य ब्रह्मचर्याश्रमस्य च विस्तरेण वर्णनं कुर्वन्ति। श्रौतसूत्राणाम् अपेक्षया गृह्यसूत्राणां विषयो विस्तृतोऽस्ति। गृह्यसूत्रेषु भारतीय-गार्हस्थ्यजीवनस्य आदर्शरूपम् उदात्ततया प्रतिबिम्बितं भवेत्। प्राचीनसभ्यतायुक्तपाश्चात्यदेशानां विशाल-साहित्ये गृह्यसूत्रसाहित्यस्येव रचनाया अभावस्तु नास्ति परन्तु एतत्तु निःसंशयं वक्तुं शक्यते यत्तत्र सूत्रसाहित्यसदृशरचनानाम् अल्पीयसी मात्रैव प्रत्यक्षीकर्तुं शक्या। गृह्यसूत्राणां विषयप्रतिपादनं कृत्वा डॉ. विण्टरनित्स अलिखत् गृह्यसूत्रे गर्भात् मृत्युपर्यन्तं षोडशसंस्कारैः सम्पूर्णजीवनं विभक्तमकरोत्। मानवस्य जीवनमिदं आत्मनः लोक-लोकान्तरयात्राया अतिरिक्तिं किंचित् नास्ति। मानवहृदयस्य भावानाम् अधिगमने व्याख्याने च गृह्यसूत्रकारः महत्त्वम् आदधाति। पुनश्च यत्र क्वचित् प्राकृतिकदृश्यानां यत् सरसं वर्णनमस्ति तत् सहृदयानां हृदयं बलात् स्वं प्रति आकर्षयति। उपनयनसंस्कारस्य प्रसंगे गुरोराश्रमे दीक्षासंस्कारः तथा विद्यार्थिना वनात् समिदाहरणम् एवं जलपूर्णकलशस्य आनयनस्य च मनोहरं चित्रं नयनस्य समक्षं बलात् आगच्छति। तस्मिन् काले गुरोराश्रमः तपोवने भवतिस्म, यः ग्रामाद् बहिः स्थितो भवतिस्म। तत्र आचार्यः शिष्यश्च प्रकृतिना सह सामञ्जस्यं संस्थाप्य आनन्दमयं जीवनम् अयापयताम्। ते तत्र स्वर्गीयम् आनन्दमनुभवन्तिस्म। ते सायं प्रातः च यज्ञानुष्ठानं तथा अतिथिसेवारूपं महत् धर्मसाधनं च कुर्वन्तिस्म। यज्ञोऽस्माकं धर्मस्यैकं महनीयम् अनुष्ठानम् आसीत्। याज्ञिककर्मैतत् मानवदेवयोः मध्ये समरसतास्थापनस्य सर्वश्रेष्ठं साधनमभूत्। इत्थं ब्रह्मचारी गुरुश्च स्वचारित्रिकदोषं चारित्रिककालुष्यं च अपसार्य जीवनं समुन्नतं कुरुतः स्म। वस्तुतः गुरोः आश्रमं यज्ञतपसां च रमणीयं स्थलमासीत्। तस्य प्रत्यक्षं दृश्यमानरूपं पवित्रं सुन्दरं च भवतिस्म। आध्यात्मिकरूपमपि पुनीतं रमणीयं चावर्तत। आश्रमे सायं प्रातः होमैः धूमेन समीपस्थं सम्पूर्णस्थानं धूमायितं भवतिस्म। कुशासनोपविष्टब्रह्मचारिणा मधुरकण्ठो-च्चारितवेदमन्त्रैः आश्रमे अद्भुतसौन्दर्यस्य सृजनं भवतिस्म। गुरोराश्रमस्यैकमात्रव्रतं परोपकारो भवतिस्म। नित्यसदाचरणं तेषां श्रेष्ठव्रतमभूत्। एतादृशानां चित्राणां दर्शनं गृह्यसूत्रेषु ब्रह्मचर्याश्रमस्य प्रसंगे भवति।

विवाहसंस्कारावसरे नवजातशिशौ जाते तथा तस्य नामकरणसंस्कारसमये, शिशोः शारीरिकवृद्धये अन्नप्राशनावसरे, दीर्घायुबलसौन्दर्यस्य प्राप्तये च चूडाकर्मसंस्कारस्यावसरे वेदाध्ययने समावर्तनसमये गृहनिर्माणे, गृहप्रवेशे भूतादिनिवारणार्थं क्रियमाण-क्रियाकलापसमये अशुभजीवानां सम्बन्धावसरे अमांगलिकपक्षिणां गृहोपवेशनसमये ज्ञाताज्ञाततया जायमानपापकर्मसु प्रायश्चित्तस्य विधानैः तथा तेषु प्रयुज्यमानमन्त्रैः तत्कालीनरीति-नीतीनां जनानां चिन्तनैः जीवनयापनप्रणाल्या च ज्ञानं जायते। उपनयनानन्तरं ब्रह्मचारिणे प्रदीयमान आचार्योपदेशः तपोमय आश्रमे

तयोः मधुरसम्बन्धश्च प्राचीनभारतस्य आदर्श-जीवन-योजनां सूचयति। विवाहसंस्कारस्यावसरे वरकन्ययोर्मध्ये परस्परं समीक्षणकर्म तयोरुभयोरेव सामजंस्यपूर्ण-भाविजीवनस्य प्रतीकमस्ति। अस्मिन् संस्कारे वरेण वध्वाः पाणिग्रहणरूपं कर्मापि भवति। तत् वराय उपदिशति यत् वध्वाः दायित्वं वरस्य सबलस्कन्धयोः आगतम्। पंचमहायज्ञानां विधानम् अग्निवेद्याः निर्माणम् अग्निस्थापनाविधिः सायं प्रातः कालीनसंध्योपासनम् अग्न्यावाहुतिः अतिथि-सत्कारः तथा पार्वणादियज्ञश्च एतत्सर्वं गृहस्थस्य पुनीतं कर्त्तव्यं भवति। एतेषां सांगोपांगं वर्णनम् एतेषु गृह्यसूत्रेषु प्राप्यते। यज्ञः सम्पूर्णजगतः तुष्टिकर्ताऽस्ति तथा कायिक-वाचिक-मानसिकशुद्धेः आत्मशुद्धेः प्रदातास्ति। वस्तुतः ज्ञानं समाप्य महाज्ञानस्य प्राप्तिर्यज्ञस्य लक्ष्यमस्ति। यज्ञाः सृष्टिपरम्परां रक्षितुम् आवश्यकसम्भारस्य चयनं कुर्वन्ति। देवमानवयोः परस्परसहयोगेनैव विश्वचक्रमिदं गतिमदस्ति। यथा-शूलगववृषोत्सर्ग इत्यनयोः यज्ञयोः प्रयोजनं स्वर्गादि-प्राप्तिरस्तीति उक्तम्। स्वर्गः आर्याणां दृष्टौ सर्वोत्तमं परममंगलमयं च स्थानमस्ति। आश्वलायन-शांखायन-कौषीतकिगृह्यसूत्रेषु कतिपयकाम्यकर्मणामपि विधान-मस्ति यथा- अर्थप्राप्तये विदेशगमनसमये क्रियमाण-कृत्यानि क्षयादि-असाध्यरोगपीडायां करणीयकार्यैश्च तन्निवारणार्थं क्रियमाणं शान्तिकर्म। बौधायनगृह्य-कोशेऽपि काम्यकर्मणाम् उल्लेखः कृतः। यथा-सर्वार्थसिद्धये दुर्गाकल्पम् धन-यश-आरोग्य-आयुष्य-पुत्र विपुल-पशुप्रभृतिसम्पत्तीनां प्राप्तये ''श्री कल्पम्'' प्रभूतज्ञानाय ''सरस्वतीकल्पम्'' कुष्ठ-क्षय-रोगात् मुक्तये ''रविकल्पम्'' एवं मृत्युविजयार्थं मृत्युंजयादि-कल्पानां विस्तरेण वर्णनं कृतम्। प्रायः सर्वेषामपि सूत्राणां समाप्तिः अन्तेष्टिसंस्कारेण भवति। सर्वेषु धर्मेषु अस्य दुःखात्मकं वर्णनं मिलति। मृत्योर्पश्चादेव मृतकस्य मुक्तिर्न भवति। तत्सम्बन्धिनो जनाः विविधकृत्यानि कुर्वन्ति। भावसंस्काराय अग्निदाहः श्रेष्ठसाधनं मन्यते। यतोहि अग्निः मृतकं पितृलोके देवलोकपितृलोकपर्यन्तं प्रेषयति। प्रेतस्य स्वर्गमार्गः अतिकठिनो यत्र सूर्य आत्मनो मार्गदर्शनं कुर्वन् नयति तथा पूषा प्रेतस्य रक्षां करोति। प्रेतयोनेः तन्मुक्तये तस्य बान्धवाः नैकविधकृत्यानि कुर्वन्ति। ते आश्वस्ता भवन्ति यत् अनेन कर्मणा प्रेतः पितृलोकं प्राप्स्यति। यत्र केवलं प्रकाश एवास्ति। यत्र यमः पितृभिः सह रममाणो दृश्यते। गृह्यसूत्रानुसारेण पिण्डदानेन उदकदानेन च पितृगणान् तोषयन्ति। तथा ते स्वजनेभ्यः वाञ्छितं फलं ददति। अन्यथा पितृलोकात् तेषां पतनं जायते। येन तस्य बान्धवाः अभिशापस्य भाजनानि भवन्ति। इत्थम् एतेषु गृह्यसूत्रेषु मानवजीवनस्य जन्मतः मृत्युपर्यन्तं समस्तसंस्काराणाम् अत्यन्तं मनोरमं चित्रणं कृतं वर्तते। अन्ते एतत् कथयितुं शक्यते यत् गृह्यसूत्रेषु भारतीयजीवनस्य यासां घटनानां विवेचनमस्ति ता सर्वा अपि वृत्तमिवाभान्ति। अस्य जीवनस्य द्वौ विशिष्टौ भागौ वर्तेते। एकतो वेदाध्ययनकर्तुः ब्रह्मचारिणः कालः। अस्य कालस्य आरम्भे उपनयनसंस्कारः अन्ते च समावर्तनसंस्कारो भवति। अपरतः विवाहितजीवनस्य कालो वर्तते यस्य गृहकार्याणां कृते विशिष्टं महत्वं विद्यते। गृह्याग्नेः गृह्यकार्येषु विशिष्टं महत्वमस्ति। गृह्याग्नेः क्रिया विवाहेन सहैव समारभ्यन्ते।

**शोधार्थी-**

**वेदविभागे, ज.रा.रा. संस्कृत विश्वविद्यालय**

**मदाऊ-भाँकरोटा, जयपुर (राज.)**

# विवाहे मेलापकस्य भकूटविचारः उपयोगिता महत्त्वञ्च

❑ गोपाल भादाणी

वरकन्ययोः जन्माङ्गकुण्डल्याः ग्रहस्थितिजन्म-नक्षत्रयोराधारेण तयोः प्रकृत्याः अभिरुच्याः साम्यतायाः पूरकत्वस्य च विचार एव 'मेलापक' मिति। स्वभावरुच्योः साम्यत्वेन परस्परं सहजप्रेमोत्पद्यते। ये जनाः परस्परं सम्पूरकाः भवन्ति तेषां निर्वाहः जीवनपर्यन्तं सानन्दं भवति। मेलापके अस्यैव समानतायाः पूरकतायाश्च विचारो भवति। वस्तुतः मेलापकं ज्योतिषशास्त्रस्य स विधिरस्ति येन अपरिचितवरकन्ययोः प्रकृत्यां अभिरुच्यां च समानतायाः तथा च जीवनस्य विविधपरिस्थित्यां तेषां परस्पर-सम्पूरकतायाः विचारः क्रियते। मेलापकेन तात्पर्यमस्ति परस्परं सम्यक्रूपेण मेलनं येन भविष्यकालीनं दाम्पत्यजीवनं सानन्दं व्यतीतं भविष्यति।

**मेलापकस्यावश्यकता-**

विवाहयोग्यवरकन्ययोः प्रकृत्यां मनोवृत्यां अभिरुच्यां स्वभावगतान्यविशेषतायां च समानतायाः ज्ञानं मेलापकेन भवति। येषां प्रकृत्यां मनोवृत्यां अभिरुच्यां च समानता भवति तेषां परस्परं मित्रता प्रेम सहजरूपेणैव भवति। भिन्नप्रकृति-अभिरुचियुक्तजनाः परस्परं शत्रवः आलोचकाः परस्परं घृणायुक्ताः वा भवन्ति अतः दाम्पत्यसम्बन्धेषु स्थिरतायाः सरसतायाः हेतुः वरकन्ययोः मेलापकोऽवश्यमेव विचारणीयो भवति। बृहस्पतिना चोक्तं-

**दम्पत्योर्जन्मताराभ्यां नामर्क्षाभ्यामथापि वा।**
**भमेलं चिन्तयेत् प्राज्ञो सुखसन्तानहेतवे।।**[32]

भारतीयपरम्परानुसारं वरकन्ययोः गुणदोषान्सुपरीक्ष्य उभयपक्षयोः सज्जनाः उभयोः जन्मकुण्डल्यौ दैवज्ञस्य समीपे उपस्थापयन्ति। उभयोः स्थिरसन्तति-सुख-सौभाग्यादिलाभस्य निमित्तार्थं दैवज्ञः यस्याधारेण विचारं करोति स एव मेलापकः कथ्यते। मेलापकः द्विविधः- क-नक्षत्रमेलापकः। ख-ग्रहमेलापकः। नक्षत्रमेलापके अष्टकूटाः प्रसिद्धाः। यथा पटलसारे[33]-

**वर्णं च वश्यं च मिथश्च तारा योनिश्च मैत्री खगयोर्गुणश्च।**
**भमेलको नाडिकशुद्धिरेते, यथोत्तरं स्युर्बलिनोऽष्टभेदाः।।**

ग्रहमेलापके जन्मकुण्डल्यां शुभाशुभग्रहाणां स्थित्यनुसारेण विचारो भवति। लग्न-चतुर्थ-सप्तम-अष्टम-द्वादशभावाश्च क्रमशः स्वास्थ्य-सुख-दाम्पत्य-आयु-व्ययकारकाः भवन्ति। एषु स्थानेषु पापग्रहाणां स्थितिवशात् तद्भावस्य हानिः भवति। अत उभयोः जन्मकुण्डल्यां ग्रहाणां शुभाशुभत्वनिरूपणं ग्रहमेलापकेन भवति।

नक्षत्रमेलापके वरवध्वोः प्रकृत्याः अभिरुच्याश्च समानतायाः विचारो भवति। ग्रहमेलापके च पापग्रहाणां स्थितिः तेषां प्रभाववशदोषाः तथा च वरवध्वोः पूरकत्वभावस्य विश्लेषणं भवति।

**नक्षत्रमेलापकः**

मतान्तरे देशान्तरे वा क्वचित् दशप्रीतयः मन्यन्ते कुत्र च अष्टकूटाः मन्यन्ते। यथा-

**वर्णो वश्यं नृदूरं च बल्लभत्वं च तारका।**
**योनिर्मित्रगणे राशिनाडिकेति क्रमाद्दश।।**[34]

परं सामान्यतया सर्वत्र अष्टकूटा एव गृह्यन्ते। यथा-

32 बृहद्दैवज्ञरञ्जनम् 71 प्रकरणम्/श्लोक-250
33 बृहद्दैवज्ञरञ्जनम् 71 प्रकरणम्/श्लोक-264
34 बृहद्दैवज्ञरञ्जनम् 71 प्रकरणम्/श्लोक-266

**तत्र दूरद्वयं हित्वा कूटं भेदाष्टकं भवेत्।**[35]
**वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।**
**गणमैत्रं भकूटञ्च नाडी चैते गुणाधिका।।**[36]

एते राशिकूटभेदाः वर्णादिमैत्र्यामेको गुणः वश्ये द्वौ गुणौ तारायां त्रयो गुणाः योनिमैत्र्यां चत्वारः ग्रहमैत्र्यां पञ्च गणमैत्र्यां षट् भकूटभेदे राशिकूटके वा सप्त नाडीभेदेऽष्टावित्यर्थः तदुक्तम्–

**वर्णो वश्यं तारायोनिग्रहगणभकूटनाडिकाश्चेति।**
**ज्ञेयो यथोत्तरं ते बलिनः स्त्रीपुंसयोर्घटने।।**[37]

दैवज्ञमनोहरेऽपि उक्तम्–

**नाडीभेदे गुणा अष्टौ सप्तसद्राशिकूटके।**
**षड्गुणा गणमैत्र्यां च सौहार्दे पञ्चखेटयोः।**
**योनिमैत्र्यां च चत्वारस्त्रयस्ताराबले गुणाः।**
**वश्यत्वे द्वौ गुणौ प्रोक्तौ वर्ण एकः प्रकीर्तितः।।**[38]

तत्र दशकूटानां तत्तद्देशविशेषप्रसिद्धत्वात्तानि विहाय सर्वदेशप्रसिद्धान्यष्टकूटानि सलक्षणानि मन्यन्ते। गौतममतेन कूटविधानम्–

**विप्राणां दशकूटं स्यात्क्षत्रियाणां तथाष्टकम्।**
**वैश्यानामथ षड्भेदं शूद्राणां च चतुष्टयम्।**[39]

नक्षत्रमेलापकस्वरूपम्– नक्षत्रमेलापके वरवध्वोः जन्मराश्यनुसारेण नक्षत्रानुसारेण च विचारो भवति। प्रमुखतः नक्षत्रमेलापके अष्टकूटानां विचारो भवति। अष्टकूटानां गुणाः अपि क्रमशः 1,2,3,4,5,6,7,8 भवन्ति। अतः गुणानां योगाः 36 भवति।

| नाम | वर्ण | वश्य | तारा | योनि | ग्रहमैत्री | गणमैत्री | भकूट | नाडी | कुलगुणाः |
|---|---|---|---|---|---|---|---|---|---|
| गुण संख्या | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 36 |

35 बृहद्दैवज्ञरञ्जनम् 71 प्रकरणम्/श्लोक-267
36 मुहूर्तचिन्तामणि 6/21 पृ. 335
37 मुहूर्तचिन्तामणि 6/21 पृ. 335 38 मुहूर्तचिन्तामणि 6/21
39 बृहद्दैवज्ञरञ्जनम् 71 प्रकरणम् श्लोक 265

वर्णानां विचारः जन्मराशिना क्रियते। वश्यविचारोऽपि वरवध्वोः जन्मराशिभ्यां भवति। ताराविचारः वरवध्वोः जन्मनक्षत्रेण भवति। जन्मनक्षत्रस्याधारेण योनिविचारः भवति। जन्मराश्यधिपतयोः परस्परशत्रुमित्रानुसारेण ग्रहमैत्री भवति। अश्विन्यादिजन्मनक्षत्रानुसारेण विचारो भवति। वरवध्वोः जन्मराश्यन्तरेण भकूटविचारो भवति। उपर्युक्ताष्टकूटानां गुणानां योगः न्यूनतमः 20 स्यात् तदा एव विवाहः शुभप्रदः। विंशतिसंख्यातः न्यूने सति वरवध्वोः वर्गविचारः करणीयः।

भकूटविचारः राशिकूटोऽपि कथ्यते। वरराशितः कन्याराशिपर्यन्तं तथा च तद्विलोमतः गणयेत्। यथाह श्रीपतिः–

**षष्ठाष्टमे मृत्युरपत्यहानिः पाणिग्रहे स्यान्नवपञ्चमे च।**
**नैस्वं धने द्वादशके परे तु प्रज्ञा निरेका हिबुके वरस्य।।**[40]

स्त्रीपुंराश्योः परस्परं षष्ठाष्टमराशित्वे मृत्युर्ज्ञेयः। यथा मेषकन्ययोः, मेषवृश्चिकयोः एवं नवात्मजे अर्थात् नवपञ्चमेऽपत्यानां नाशः स्यात्। यथा सिंहधनुषोः। एवं द्विर्द्वादशे सति निर्धनत्वं दारिद्र्यं स्यात्। यथा–मेषवृषयोः। अन्यत्र तृतीयैकादशे चतुर्थदशमे समसप्तमे वा सौख्यकृत्पाणिपीडनं स्यात्। यथोक्तं नारदेनः–

**षष्ठाष्टके मृतिर्नन्दनवमे त्वनपत्यता।**
**नैः स्वं द्विर्द्वादशेऽन्येषु दम्पत्योः प्रीतिरुत्तमा।।**[41]

अपरं च–

**मृत्युः षष्ठाष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे।**
**द्विर्द्वादशे निर्धनत्वं द्वयोरन्यत्र सौख्यकृत्।।**[42]

परं विकलाङ्गानां विवाहे, पुनर्विवाहे, चरित्रहीनस्त्रीवृद्धपुरुषयोश्च विवाहे आसुरादिविवाहेषु राशिकूटस्य विचारो न भवति। यथोक्तम्–

40 वृहद्दैवज्ञरञ्जनम् 71 प्रकरणम् श्लोक 352
41 मुहूर्तचिन्तामणि 6/31, 42 मुहूर्तचिन्तामणि 6/31

**आसुरादिविवाहेषु राशिकूटं न चिन्तयेत्।**
**तथाव्यङ्गातिवृद्धानां दुर्भगानां पुनर्भवाम्।।**[43]

**राश्यैक्यम्**- यदा वरकन्ययोः एको राशिः भवेत्तदा दाम्पत्यजीवनं शुभं भवति। राश्यैक्यं सर्वदोषाणां नाशकं भवति परं राश्यैक्येन सह नक्षत्रैक्यं त्याज्यं च भवति। यथोक्तम्-

**एकराशौ शुभोद्वाह एकभांशे मृतिप्रदः।** **(मार्तण्डवल्लभा)** राश्यैक्यं चतुर्विधं भवति- 1. राश्यैक्यं नक्षत्रभेदश्च, 2. एकनक्षत्रं परं राशिभिन्नता, 3. राश्यैक्यं नक्षत्रैक्यं परं चरणभेदः, 4. राश्यैक्यं-नक्षत्रैक्यं चरणैक्यं च।

अत्र चतुर्थप्रकारः एव पूर्णरूपेण दूषितो भवति। अतः नक्षत्रैक्यं राश्यैक्यं चरणैक्यं च सर्वथा वर्जनीयं यदा चरणभेदो भवेत्तदा विवाहः कल्याणकारी भवति। यथोक्तं कालनिर्णये-

**दम्पत्योरेकनक्षत्रे भिन्नपादे शुभावहः।**
**दम्पत्योरेकपादे तु वर्षान्ते मरणं ध्रुवम्।।**[44]

द्विर्द्वादशः- यदि परस्परं उभयोः राशिः द्विर्द्वादशे भवेत्तदा विवाहः निर्धनत्वकारको भवति। अतः द्विर्द्वादशः परिवर्जनीयः। उक्तं यथा ज्योतिः प्रकाशेः-

**द्विर्द्वादशे धनगृहे धनहा च कन्या।**
**रिष्फे स्थिता धनवती पतिवल्लभा च।।**[45]

अर्थात् पुरुषस्य राशितः कन्यायाः राशिः द्वितीयो भवेत्तदा कन्याधनहानिकारिका यदा च द्वादशो भवेत्तदा सा धनवती पतिप्रिया च भवति। यदा वरकन्ययोः कन्यावरयोः युग्मराशिषु मीन-मेष, वृष-मिथुन, कर्क-सिंह इत्यादि क्रमेण भवेत्तदा विवाहः शुभफलदो भवति। यथा-

**सिंहः कुलीरेण मृगेण कुम्भ-**
**स्तौलिः स्त्रियां चापधरेण कीटः।**
**वैशारिणोजे च वृषेण युग्मं**
**द्विर्द्वादशे भूरिधनप्रदाः स्युः।।**[46]

यदा च मेष-वृषौ, मिथुन-कर्कौ, सिंह-कन्ये इत्यादि क्रमेण भवेत्तदा विवाहः अनिष्टप्रदो भवति।

**द्विर्द्वादशं शुभं प्रोक्तं मीनादौ युग्मराशिषु।**
**मेषादौ युग्मराशौ तु निर्धनत्वं न संशयः।।**[47]

अपि च मतान्तरेण-

**सिंहकन्ययोः द्विर्द्वादशः ग्राह्यो भवति।**

अपरं च -

**समं भं द्विर्द्वादशके द्वितीयसहितं श्रेष्ठस्त्रिया युग्धरिः।**

**3. त्रिरेकादशः**-

वरकन्ययोः परस्परं त्रिरेकादशः सर्वथा शुभफल-दायको भवति। उक्तं यथा-

**एकराशौ महाप्रीतिश्चतुर्थदशमे सुखम्।**
**तृतीयैकादशे वित्तं सुप्रजा समसप्तके।**[48]

अर्थात् तृतीयैकादशसम्बन्धः धनप्रदायको भवति। 4. चतुर्थदशमः-उभयोः राश्योः चतुर्थदशमः योगः शुभो भवति। 5. नवपञ्चमः- अपत्यहानिर्नवात्मजे अर्थात् नवपञ्चमे बालानां नाशो भवति। कन्यायाः वरस्य, वरात्-कन्यायाः वा राशिर्नवपञ्चमे यदा भवेत्तदा सन्तानहानिः भवति। अत्र किञ्चित् अपवादो वर्तते, यत् वरस्य पञ्चमः कन्यायाः, कन्यायाः नवमो वरः भवति तदा नवपञ्चम-दोषो न भवति अर्थात् तदा शुभफलदायको भवति। उक्तं यथा बृहज्ज्योतिषसारे-

**वरस्य पञ्चमे कन्या, कन्यायाः नवमे वरः।**
**एतत्त्रिकोणकं ग्राह्यं पुत्रपौत्रसुखावहम्।।**[49]

43 वृहद्दैवज्ञरञ्जनम् 71 /64, 44 वृहद्दैवज्ञरञ्जनम् 71 /439
45 वृहद्दैवज्ञरञ्जनम् 71 /429

46 तत्रैव 71/380, 47 वृहद्दैवज्ञरञ्जनम् 71 / 379
48 वृहद्दैवज्ञरञ्जनम् 71 / 376, 49 वृहद्दैवज्ञरञ्जनम् 71 / 347

मतान्तरे वरस्य पञ्चमे कन्या यदा भवेत्तदा संततिक्षयो भवति। उक्तञ्च ज्योतिप्रकाशे-

**पुंसो गृहात्सुतगृहे सुतहा च कन्या।**
**धर्मे स्थिता धनवती पतिवल्लभा च।।**[50]

अत उभयोः सामञ्जस्यं तदैव सम्भवं भवेत् यदा परस्परं राशयोर्मैत्र्यं भवति। तत्र मीन-कर्कौ, वृश्चिक-कर्कौ, कुम्भ-मिथुनौ, मकर-कन्ये च एतन्नवपञ्चकः विशेषतया त्याज्यो भवति। उक्तं यथा शार्ङ्गधरीये-

**मीनालिभ्यां युतकीटे कुम्भे मिथुनसंयुते।**
**मकरे कन्यकायुक्ते न कुर्यान्नवपञ्चकम्।।**[51]

तत्र ग्राह्यनवपञ्चकः- मेषः-सिंहौ, वृष-कन्ये, मिथुन-कुम्भौ, वृश्चिक-कर्कौ, सिंह-धनुषी, मकर-कन्ये, च शुभो भवति। यथा-

**मेषे च सिंहे वृषभे च कन्ये**
**युग्मे घटे वृश्चिककर्कटे च।**
**सिंहे च चापे मकरे युवत्या**
**मित्रत्रिकोणं बहुपुत्रलाभः।।**[52]

यदा राश्योर्मैत्र्यं राश्योरेकपतित्वं, नंवाशेशराश्योर्मैत्र्यं च भवेत्तदा नवपञ्चमदोषो निष्फलो भवति।

**6. षडष्टकः-**

स्त्रीपुरुषराश्योः षडाष्टकः योगो अशुभो भवति। परं स्त्रीपुरुषराश्योरेकाधिपत्ये एकस्वामित्वं परिणयो विवाहो शुभो भवति। यथा षष्ठाष्टके मेषवृश्चिकयोस्तुलावृषयोर्वा विवाहः शुभो भवति। अथवा राशीश्वरयोः मैत्रे सौहृदे परिणयः शुभो भवति। एतद्भिन्नं मित्रषष्ठाष्टकं जगन्मोहने-

**मित्रषट्काष्टकं कीटमेषयोर्वृषजूकोः।**
**कर्किचापभयोर्मीनसिंहयोर्मृगयुग्मयोः।।**
**कन्यकाकुम्भयोरन्यप्रयत्नादिह वर्जयेत्।।**[53]

एकाधिपत्ये भवनेशमैत्रश्च विवाहः शुभप्रदो भवति यथाह नारदः-

**द्विर्द्वादशे वा नवपञ्चमे वा षष्ठाष्टके राक्षसयोषितो वा।**
**एकाधिपत्ये भवनेशमैत्रे शुभाय पणिग्रहणे विधेयम्।।**[54]

केवलं शत्रुषडाष्टकं एव त्याज्यं भवति। यथा- मेष-कन्ये, वृष-धनुषी, मिथुन-वृश्चिकौ, कर्क-कुम्भौ, सिंह-मकरौ, तुला-मीनश्च प्रोक्ता अशुभप्रदाः षष्ठाष्टकाः। यथाह नारदः- **वैरं षष्ठाष्टकं मेषकन्ययोर्घटमीनयोः।**

**चापोक्षयोर्नक्रीटभयोः कुम्भकुलीरयोः।**
**पञ्चास्यमृगयोर्जन्मराशेः प्रोक्तोऽशुभप्रदः।।**[55]

**7. समसप्तकः-**

उभयोः पुरुषस्त्रियोः जन्मराश्योः परस्परं समसप्तकयोगः शुभफलप्रदो भवति। अत्र यदा राश्योर्मैत्र्यं न स्यात्तदापि सम्बन्धः शुभो भवति। उक्तं यथा-[56]

**समसप्तके विवाहो भवति सखित्वं शुभं चैव।**
**एकादशे तृतीये कुलवृद्धिर्भवति चाशु नियमेन।।**

किन्तु समसप्तकेऽपि मकर-कर्कौ, कुम्भ-सिंहौ, इति त्याज्यौ इति केचन[57]- **मृगः कुलीरेण घटेन सिंहो वैरप्रदः, स्यात्समसप्तकोऽयम्।**

अपि च-

**योगके सप्तके मेषतुल्ये युग्महयौ तथा।**
**सिंहघटौ सदा वर्ज्यौ मृतिं तत्राब्रवीच्छिवः।।**[58]

किन्तु मुहूर्त्तचिन्तामणौ षष्ठाष्टक-द्विर्द्वादश-नवमपञ्चम-इत्येतान् विहाय अन्ये शुभाः सन्ति इति मान्यतास्ति।[59]

**शोधच्छात्रः**
**ज.रा.रा.सं. विश्वविद्यालय, जयपुर**

50 वृह ज्यो सार, 51 वृहद्दैवज्ञरञ्जनम् 71 / 373
52 वृहद्दैवज्ञरञ्जनम् 71 / 371, 53 वृहद्दैवज्ञरञ्जनम् 71 / 366-367

54. मु.चि. 6/32 पीयूषधारा टीका, 55. मु.चि. 6/32 पीयूषधारा टीका
56. वृहद्दैवज्ञरञ्जनम् 71/386, 57. वृहद्दैवज्ञरञ्जनम् 71/383
58. वृहद्दैवज्ञरञ्जनम् 71/385, 59.मु.चि. 6/32 पीयूषधारा टीका

नारी-स्तम्भः

# परोपकारार्थमिदं शरीरम्

❑ डॉ. राजेश्वरी भट्ट

परोपकाराय गृहीतजन्मा 'सावित्रीबाई फुले' राष्ट्रे प्रथममहिला शिक्षिका निष्ठावती समाजसेविका उत्कृष्टकविकर्मणां 'मराठी काव्य की अग्रदूत' इत्यादिभिः सम्मानसूचकैर्वचोभिः अभिनन्द्यते। 3 जनवरी 1831 तमे ख्रिस्ताब्दे महाराष्ट्रप्रदेशान्तर्गते 'नवग्रामे' एकस्मिन् कृषकपरिवारे पित्रोरनेकजन्मनां पुण्यानां फलेन कन्यारूपेण सावित्रीबाई जनिमलभत। सावित्र्या वयसो नववर्षाण्यतीतानि यदा 1840 तमे ख्रिस्ताब्दे बालिकायाः सावित्र्या विवाहसंस्कारो द्वादशवर्षीयेन नवचेतना-भरितेन समाजे व्याप्तेन वैषम्येन चेष्टमानेन 'ज्योतिराव फुले' नाम्ना युवकेन सह सम्पन्नो जातः। विवाहपूर्वं सावित्रीबाई शिक्षया वञ्चिताऽऽसीत् किन्तु विवाहानन्तरं भर्ता ज्योतिरावफुले पत्न्याः सावित्र्याः कृते अध्ययनस्य सुप्रबन्धं कृतवान्। ज्योतिरावफुलेमहोदयस्य निर्देशने सावित्रीबाई क्रमशः समुचितशिक्षामधिगतवती। 'ज्योतिराव-फुले' पत्न्याः संरक्षको गुरुर्मार्गदर्शकश्चाऽऽसीत्। सम्प्रति भर्त्रा कृतेन प्रबन्धनेन सावित्र्याः श्रमेण च सम्बुद्धा प्रबुद्धा सावित्रीबाई सामाजिककार्येषु छायेव पतिमन्वसरत्। सहैवानेन सा मनसा वाचा कर्मणा नारीसमुन्नयनस्य योजनासु संलग्ना जाता। समय स आसीत् यदा समाजे नारीणां स्थितिः शोचनीयतराऽवर्तत। बालविवाहो विधवोत्पीडन, तत्केशकर्तनं, देहशोषणं तादृशीभिर्यातनाभिः भर्तृविही-नानां नारीणां जीवनं घोरकष्टमयमासीत्। सावित्री-बाई समाजे व्याप्तानां कुरीतीनां विरोधे मुखरिता संघर्षरता च जाता। प्रथमं तु सा नारीणां शिक्षायै 1848 तमे ख्रिस्ताब्दे पुणेनगरे जातिवर्गभेद-विहीनस्य बालिका-विद्यालयस्य स्थापनां कृतवती यत्र कस्यापि बालिकायाः कृते प्रवेशप्राप्तिः सुलभाऽऽसीत्। तथापि नारीशिक्षाया घोरविरोधिनां समाजस्य स्वयंभूसंरक्षकाणां भयेन विद्यालये केवलं नवसंख्यक बालिकाः प्रवेश-मलभन्त। आत्मना विहितस्य सत्कर्मणो दुष्परिणामं जानन्त्यपि सावित्रीबाई धैर्यं धृत्वा विद्यालये अध्यापनकार्ये प्रवृत्ता जाता। आत्मनः संकल्पं साधयितुं 'सावित्रीबाई' महत्कष्टान्यसहत। पूर्वं तु केचिद् विरोधिनो न केवलं विद्यालयमार्गे गच्छन्तीनां बालिकानामुपरि अपितु सावित्रीबाईमहाभागाया उपर्यपि गोमयविष्ठपाषाणा-वस्त्रादीनि मलिनवस्तूनि प्राक्षिपन्। यैः सावित्र्या वासांसि दुर्गन्धमयानि मलिनानि चाऽभवन्। अतः सावित्री-बाई स्यूतके अन्यानि वस्त्राणि निधाय विद्यालयमगच्छत्। समाज-विरोधिभ्यो भीतैः अस्याः परिजनैः विवशा तया फुले दम्पती गृहाद्बहिर्निष्का-सितौ। शनैः शनैः सावित्रीदेव्याः परया निष्ठया महत्त्यागेन च विद्यालयेऽध्ययनरतानां बालिकानां मनसि शिक्षायाः सार्थकता तथा अध्ययनं प्रति चेतना प्रस्फुटिता जाता। आत्मनः संकल्पस्य सत्परिणामेन सन्तुष्टा 'सावित्रीबाई' भर्तुः सहयोगेन सम्प्रति विभिन्न-स्थानेषु अष्टादश महिलाशिक्षण संस्थानां स्थापनां कृत्वा लोके आदर्शं प्रस्तुतवती। एवदतिरिक्तं सावित्रीबाई महिलाविकासाय सतीप्रथा-बालविवाह-अस्पृश्यता भ्रूणहत्या विधवोत्पीडनादीनां समाजे व्याप्तानां कुरीतीनाम् उन्मूलनाय महत्प्रयत्नं कृतवती। अस्मिन् प्रसंगे सावित्रीबाई भर्तुः सहयोगेन 'बालहत्याप्रतिबन्धकगृहम्' इति संस्थायाः स्थापनां कृत्वा महिलामङ्गलं कृतवती। किमधिकं अस्मिन् बालहत्याप्रतिबन्धकगृहे शरणागतायाः पति-विहीनाया मरणोत्सुकायाः 'काशीबाई' इति गर्भवत्या पीड़िताया रक्षां कृत्वा तस्य पुत्रम् आत्मनः पुत्रमिव पालयित्वा तस्य जीवनं निर्माय फुले दम्पती दिव्यकर्म आचरितवन्तौ। कालेन स बालकः यशवन्तः कुशल चिकित्सको जातः। दुर्भाग्येन 24 नवम्बर 1890 तमे ख्रिस्ताब्दे सावित्रीदेव्याः सर्वस्वं 'ज्योतिराव फुले' दिवं प्रयातः। धृतिमती सावित्रीबाई फुले भर्तुः अपूर्णानि कार्याणि साधयितुं कृतसंकल्पा जाता। सहसा नगरे संक्रमिते, महामारीरोगेण संक्रमितानां रोगिणां परिचर्यायां समर्पिता परोपकारव्रतधारिणी सावित्री-बाई स्वयमपि अनेन संक्रामकरोगेण संक्रमिता कालेन च कवलिता जाता। आजीवनं परोपकारे तत्परा सावित्री लोके स्मरणीयाऽऽनुकरणीया च वर्तते।

## हिन्दी अनुवाद

परोपकार करने के लिए जन्मग्रहण करने वाली सावित्री बाई फुले को राष्ट्र की प्रथम महिला शिक्षका-निष्ठावती समाज सेविका-उत्कृष्ट कविकर्म के कारण मराठीकाव्य की अग्रदूत के रूप में प्रशंसनीय वचनों से सम्मानित किया गया है। सावित्री बाई फुले का जन्म 3 जनवरी 1831 ई. में महाराष्ट्र प्रदेश के नया गाँव में एक कृषक परिवार में अनेक जन्मों के पुण्यों के फलस्वरूप कन्या के रूप में हुआ था 1840 में सावित्री बाई फुले ने अपनी उम्र के 12 वर्ष ही पूर्ण किए थे जब उनका विवाह नवचेतना से स्फूर्त समाज में व्याप्त विषमताओं से व्याकुल 'ज्योतिराव फुले' नामक युवक के साथ सम्पन्न हुआ। विवाह के पूर्व सावित्रीबाई शिक्षा से विहीन थी। किन्तु पति के घर मे ंआगमन के पश्चात् अपने पति ज्योतिराव फुले के निर्देशन में सावित्रीबाई ने समुचित शिक्षादीक्षा प्राप्त की। 'ज्योतिराव फुले' सावित्री बाई के संरक्षक, गुरु एवं मार्गदर्शक थे। अपने पति के निर्देशन एवं स्वयं के परिश्रम से सम्बुद्ध प्रबुद्धा सावित्रीबाई ने सामाजिक कार्यो में छाया की भाँति पति का अनुसरण किया। साथ ही सावित्रीबाई मन वचन एवं कर्म से नारी समुन्नयन की योजनाओं में संलग्न हो गईं। यह वह समय था जब समाज में नारियों की स्थिति अत्यधिक शोचनीया थी। बाल विवाह, विधवोत्पीड़न अपने केशकर्तन देहशोषण आदि यातनाओं से विधवा नारियों का जीवन घोरकष्ट पूर्ण था। सावित्री बाई ने समाज में व्याप्त कुरीतियों के विरोध में आवाज उठाई एवं संघर्षरत रहीं। सर्वप्रथम सावित्रीबाई ने 1848 ई. में नारी शिक्षा के लिए जातिवर्गादि के भेद से रहित बालिका विद्यालय की स्थापना की जिसमें किसी भी बालिका के लिए प्रवेश प्राप्त करना सुलभ था, तथापि नारी शिक्षा के घोर विरोधी समाज के स्वयंभू ठेकेदारों के भय से विद्यालय में केवल 9 (नौ) बालकाओं ने प्रवेश प्राप्त किया। अपने द्वारा प्रारम्भ किए सत्कर्म का इतना बुरा परिणाम जानकर भी सावित्री बाई ने धैर्य धारण कर विद्यालय में अध्यापन कार्य किया एवं निरन्तर भयंकर कष्टों का सम्मान किया। प्रारम्भ में कुछ विरोधी तत्त्वों ने केवल विद्यालय जाती हुई बालिकाओं के ऊपर ही नहीं अपितु सवित्रीबाई के ऊपर भी गोबर, मल, पत्थर एवं मलिन वस्तुओं को फेक कर विरोध प्रदर्शित किया। विरोधियों के इस घृणित कर्म से सावित्रीबाई के वस्त्र दुर्गन्ध से पूर्ण एवं मलिन हो जाते थे फलस्वरूप सावित्रीबाई को एक थैले में अन्य वस्त्र रखकर विद्यालय आना पड़ता था। इन विरोधियों के भय से परिवार जनों के द्वारा फुले दम्पती को घर से भी निकाल दिया गया। किन्तु शनैः शनैः सावित्रीबाई की निष्ठा एवं त्याग से विद्यालय में अध्ययनरत बालिकाओं के मन में शिक्षा की सार्थकता तथा अध्ययन के प्रति सजगता प्रस्फुटित होने लगी। अपने संकल्प केसत्परिणाम से सन्तुष्ट सावित्र बाई ने पति के सहयोग से भिन्न-भिन्न स्थानों पर अठारह बालिका विद्यालयों की स्थापना की एवं लोक में आदर्श प्रस्तुत किया। इसके अतिरिक्त सावित्रीबाई ने महिलाओं के कल्याण के लिए बालविवाह, सतीप्रथा अस्पृश्यता, भ्रूणहत्या, विधवोत्पीड़न आदि कुरीतियों के उन्मूलन के लिए अथक प्रयत्न किया। इस प्रसंग में अपने पति ज्योतिराव फुले के सहयोग से बाल हत्या प्रतिबन्धक गृह की स्थापना की। इस प्रतिबन्धकगृह में शरणागत एवं मरने के लिए उत्सुक, विधवा, गर्भवती काशीबाई नामकी पीड़िता की रक्षाकर उसके पुत्र का पालन पोषण तथा जीवन निर्माण कर फुले दम्पती ने दिव्यकर्म किया।

समय से वही बाल श्रेष्ठ चिकित्सक एवं चिकित्सालय का अधीक्षक बना। दुर्भाग्य से 28 नवम्बर 1890 ई. में सावित्री देवी के जीवन सहचर 'ज्योतिराव' फुले का देहावसान हो गया धैर्यशीला सावित्रीबाई ने पति के अपूर्ण कार्यो को पूर्ण करने का संकल्प किया। इसी बीच महाराष्ट्र में फैले हुए महामारी (प्लेग) रोग से संक्रमित रोगियों की सेवा के लिए समर्पित सावित्री बाई स्वयं प्लेग रोग से संक्रमित हो गई एवं 10 मार्च 1897 ई. को प्राणों त्याग कर दिया। आजीवन परोपकार करने वाली सावित्री बाई स्मरणीय हैं।

-सी-276, भाभा मार्ग, तिलकनगर, जयपुर

आयुर्वेद-स्तम्भः

# अध्ययने कृतबुद्धिर्भवेच्छिष्यः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वेदानां विभिन्नानाञ्च शास्त्राणां तथाऽन्येषां विषयाणामध्ययनाध्यापनयोः व्यवस्थाऽतीव श्रेष्ठा व्यवस्थिता चासीत्। गुरुकुलेषु गुरुशिष्यपरम्परया पाठ्यमानानां छात्राणामध्यापने निरतानाञ्च गुरूणां निकटतः सम्पर्कः सम्बन्धश्च विद्यते स्म। कदा केन विधिनाऽध्यापनं करणीयमासीत् तथा केन विधिना गुरोरुपदिष्टानां वचनानां शास्त्रसन्दर्भानाञ्च कण्ठ-स्थीकरणमर्थानाञ्च प्रबोधनं करणीयमासीदिति तु गुरवः शिष्याश्च सम्यक् जानन्ति स्म। कदा छात्राः परीक्षणीयाः कदा च ते दीक्षान्तयोग्याः भवन्ति स्म इत्यपि गुरव एव सुनिश्चितं कुर्वन्ति स्म। विद्याध्ययन-काले छात्रस्य सम्पूर्णं जीवनं भविष्यनिर्धारणञ्चापि गुरोरधीनमेव भवति स्म। अत एव पुत्रवत् परिपालितेषु शिष्येषु लेशमात्रस्यापि मनोविकारस्य प्रादुर्भावो न भवति स्म।**

वेदों तथा विभिन्न शास्त्रों के एवं अन्य विषयों के अध्ययन और अध्यापन की व्यवस्था अत्यन्त ही श्रेष्ठ और व्यवस्थित थी। गुरुकुलों में गुरु-शिष्यपरम्परा से पढाये जाने वाले छात्रों का और अध्यापन में लगे हुए गुरुओं का निकट सम्पर्क और सम्बन्ध था। कब किस विधि से अध्यापन करने योग्य था तथा किस विधि से गुरु के उपदिष्ट वचनों का और शास्त्र के सन्दर्भों का कण्ठस्थ करना तथा अर्थों का ज्ञान करणीय था यह सब गुरु और शिष्य अच्छी प्रकार से जानते थे। छात्रों का परीक्षण कब करना है तथा वे कब दीक्षान्त के योग्य होते थे यह भी गुरु ही निश्चित करते थे। विद्याध्ययन-काल में छात्र का सम्पूर्ण जीवन और भविष्य निर्धारण भी गुरु के ही अधीन होता था। इसलिए पुत्र की तरह परिपालन किए गए शिष्यों में थोड़े से भी मनोविकार की उत्पत्ति नहीं होती थी।

**वर्तमानकाले तु गुरुशिष्ययोः सम्बन्धः न तादृशः। अध्ययनविधिरपि पूर्णतः परिवर्तितः विद्यते। परीक्षाकालस्तु कालवत् प्रतिभासते। परीक्षाविधितः भीताः छात्राः व्याकुलाः भवन्ति। बहुविधैर्मनोविकारै-र्ग्रस्ता छात्राः त्रस्ताः भवन्ति। अध्यापकानां संरक्षणेन विरहितास्ते चिन्तातुरा अध्ययने दत्तचित्ताः न भवन्ति। पितरावपि सर्वदा श्रेष्ठं परीक्षाफलं काङ्क्षन्तौ धर्षयत एव। छात्रास्तूत्कृष्टमध्याल्पबुद्ध्यस्त्रिविधाः भवन्ति किन्तु परीक्षा त्वेकविधैव भवति। न हि सर्वे छात्राः समानरूपेणाङ्कोपलब्धिं कुर्वन्ति। परस्परं स्पर्धमानाः हि छात्रा सर्वदा श्रेष्ठमेव परीक्षाफलमाकांक्षमाणाः मानसिक तनाव (Stress) इत्येनन ग्रस्ताः भवन्ति। मनोविकृतिग्रस्ताः दुःखसन्तप्तास्ते किंकर्तव्यविमूढाः भवन्ति। प्रतियोगिपरीक्षा तु कस्मिंश्चिदपि काले निर्धारिता भवति, किन्त्वन्यास्तु परीक्षाः सामान्यतः मार्चमासतः जून मासपर्यन्तं भवन्ति।**

वर्तमान काल में तो गुरु-शिष्य का सम्बन्ध वैसा नहीं है। अध्ययन-विधि भी पूर्णतः परिवर्तित है। परीक्षा काल तो काल की तरह आभासित होताहै। परीक्षाविधि से डरे हुए छात्र व्याकुल होते हैं। अनेक प्रकार के मानसिक विकारों से ग्रस्त छात्र त्रस्त (भयभीत, आतङ्कित) हो जाते हैं। अध्यापकों के संरक्षण से रहित चिन्ताग्रस्त वे अध्ययन में दत्तचित्त नहीं होते हैं। सर्वदा श्रेष्ठफल की इच्छा करने वाले माता-पिता भी उसका धर्षण (दबाव बनाना, अत्याचार करना) करते हैं। छात्र तो उत्कृष्ट बुद्धि वाले, मध्यबुद्धि वाले और अल्प बुद्धिवाले इस प्रकार तीन तरह के होते हैं, लेकिन परीक्षा तो एक ही तरह की होती है। सभी छात्र समान रूप से अङ्क प्राप्त नहीं करते हैं। परस्पर स्पर्धा करते हुए छात्र सदा श्रेष्ठ ही परीक्षाफल की आकांक्षा करते हुए 'मानसिक तनाव' (Stress) से ग्रस्त हो जाते हैं। मनोविकार से ग्रस्त दुःख सन्तप्त वे किंकर्तव्य विमूढ हो जाते हैं। प्रतियोगी-परीक्षाएं तो कभी भी निर्धारित हो जाती हैं, किन्तु अन्य परीक्षाएं तो सामान्यतः मार्च मास से जून मास पर्यन्त होती हैं।

**अध्ययनार्थं प्रवेशकाले परीक्षाकाले च छात्रैः किं करणीयमिति तु संक्षेपेणात्रोल्लिख्यते-**

**परीक्षातः पूर्वमध्ययनक्रमागते प्रवेशकाल एव बुद्धिमान् छात्र आत्मनः कार्यं गुरुलाघवं कर्मफलमनुबन्धं तथा स्वस्थबुद्धेः स्वरूपमवलोक्य युक्तिपूर्वकं स्वानुकूलस्य विषयस्य चयनं कुर्यात्। न तादृग्विधस्य विषयस्य चयनं कुर्याद् यो हि बुद्धिगम्यः न भवेत्। यतो हि कालेऽस्मिन् विविधाः विषयाः प्रचरन्ति लोके। तत्र यन्मन्येत सुमहद्यशस्विधीरपुरुषासेवितमर्थबहुलमाप्तजनपूजितं स्वस्य बुद्धेरनुकूलं तथा यद् हितं बुद्धिगम्यञ्च भवेत्तदभिप्रपद्येत शास्त्रम्। शास्त्रानुकूलस्यैवाचार्यस्य विद्यालयस्य च चयनं करणीयम्। अध्यापकस्तु प्रकृतिज्ञः प्रतिपत्तिज्ञः दक्षः दक्षिणः, शिष्यवत्सलः ज्ञापनसमर्थश्च भवेत्। यद्येतादृग्विधोऽध्यापकः चयनिते तस्मिन् विद्यालये कञ्चिद् विषयमधिकृत्य न मिलन्ति तदा 'ट्यूशन' इति विशिष्टविधायां प्रचलिते क्रमे श्रेष्ठेनाध्यापकेनाध्ययनं प्रथमरूपेण प्रकुर्वीत।**

अध्ययन केलिए प्रवेश लेते समय और परीक्षा देते समय छात्रों को क्या करना चाहिए यह तो संक्षेप में यहाँ उल्लिखित कियाजा रहा है-

परीक्षासे पहले अध्ययन के क्रम में प्रवेश लेते समय ही बुद्धिमान् छात्र अपने कार्य की गुरुता एवं लघुता, कर्मफल, अनुबन्ध (कर्म या कार्य का उत्तरकालीन फल) को तथा अपनी बुद्धि से स्वरूप को देखकर युक्तिपूर्व अपने अनुकूल विषय का चयन करे। उस तरह से विषय का चयन न करे जो बुद्धिगम्य न हो। क्योंकि इस समय लोक में (तथा व्यवहार में) अनेक प्रकार के विषय प्रचलित हैं। उन में जिसको महान्, यशस्वी और धैर्यशाली पुरुषों के द्वारा प्रयोग में लाया जाने वाला (सेवित), अनेक अर्थ (प्रयोजन, तात्पर्य) वाला, आप्त पुरुषों द्वारा पूजित (प्रशंसित, अनुमत) अपनी बुद्धि के अनुकूल माने तथा जो हितकर और बुद्धिगम्य हो उस शास्त्र (विषय) को प्राप्त करे (चयन करें)। शास्त्र (विषय) के अनुकूल ही आचार्य का और विद्यालय का चयन करना चाहिए। अध्यापक तो (शास्त्र एवं शिष्य की) प्रकृति को जानने वाता, प्रतिपत्तिज्ञ (तात्कालिक रूप में किसी भी कर्तव्य को करने का ज्ञान रखने वाला) दक्ष, दक्षिण (अनुकूल स्वभावाला), शिष्यों पर स्नेह रखने वाला तथा, विषयों को समझाने में समर्थ होना चाहिए। यदि ऐसा अध्यापक उस चयनित विद्यालय में किसी विषय विशेष में न मिले तो ट्यूशन रूपी विशिष्ट विधा में प्रचलित क्रम में श्रेष्ठ अध्यापक से पृथक् रूप में अध्ययन करना चाहिए।

**प्रारम्भत एव प्रतिदिनमेव ब्राह्मे मुहूर्ते मनः पुरःसराभिर्वाग्भिः विषयमनुक्रामन् पुनः पुनरावर्तयेद् बुद्ध्या सम्यगनुप्रविश्यार्थतत्त्वं स्वदोषपरिहारार्थं च। एवमेवाऽपराह्णे रात्रौ च स्वतन्त्ररूपेण शश्वदपरिहापयन्नध्ययनमभ्यसेत्। प्रातः कालतः मध्याह्नपर्यन्तं तु विद्यालयेऽध्ययनं कुर्यात्।**

**आवश्यकरूपेण रात्रौ नववादने दशवादने वा शयनार्थमुपगच्छेत्। सप्त होरापर्यन्तं निद्रावशगो भवेत्। वर्तमानकाले छात्राः मध्यरात्रिपर्यन्तमध्ययनं कुर्वन्ति प्रातःकाले च विलम्बेन शय्यात्यागं कुर्वन्ति, नैतदुचितम्। ब्राह्मे मुहूर्ते तु बुद्धेर्नैर्मल्यं भवति शान्त उपयुक्तः विषयग्रहणकालश्च भवति।**

**परीक्षाकाले तु विशिष्टरूपेणाध्ययने निरतो भवेत् किन्तु सर्वदा चिन्तामुक्तः पूर्ववन्निद्रासेवी च भवेत्। अधिकं जागरणं न कुर्यात्। यथोचितकाले पौष्टिकं सुपाच्यं द्रवबहुलमाहारमुपसेवेत। न चात्यल्पं न चात्यधिकं भोजनं कुर्यात्। उष्णं, स्निग्धं, मात्रावत्, जीर्णे, वीर्याविरुद्धं भोजनमजल्पन्, अहसन्, तन्मना भुञ्जीत, आत्मानमभिसमीक्ष्य सम्यक् परीक्षाकाले आहारग्रहणे विशेषेण सावहितचित्तो भवेत्।**

प्रारम्भ से ही प्रतिदिन ही ब्राह्म मुहूर्त्त में एकाग्र मन से प्रणीत वाणी से विषय को यथाक्रम व्यवस्थित (अनुक्रमण) करता हुआ अर्थतत्त्व को जानकर गहराई

तक प्रवेशकर के (समझ कर) अपने दोषों को (त्रुटियों को) दूर करने के लिए बार-बार आवृत्ति करे (दोहरावे)। इसी तरह से अपराह्न में और रात्रि में स्वतन्त्र रूप से समय को व्यर्थ न करते हुए अध्ययन का अभ्यास करें। प्रातःकाल से मध्याह्न पर्यन्त तो विद्यालय में अध्ययन करें।

आवश्यक रूप से रात्रि में नौ बजे या दश बजे शयन करें। सात घण्टे की नींद लेनी चाहिए। वर्तमान काल में छात्र मध्यरात्रि तक अध्ययन करते हैं और प्रातःकाल में विलम्ब से शय्या त्याग करते हैं, यह ठीक नहीं है। ब्राह्म मुहूर्त में तो बुद्धि की निर्मलता होती है और शान्त, उपयुक्त विषय ग्रहण काल होता है।

परीक्षाकाल में तो विशेषरूप से अध्ययन में निरत रहना चाहिए। किन्तु सर्वदा चिन्ता से मुक्त और पहले की तरह (पूरे समय 7 घण्टे) निद्रा का सेवन करने वालो होना चाहिए। अधिक नहीं जागना चाहिए। उपयुक्त समय में पौष्टिक, सुपाच्य और द्रव्य प्रधान आहार का सेवन करना चाहिए। अत्यन्त कम और अत्यधिक भोजन नहीं करना चाहिए। उष्ण, स्निग्ध और उचित मात्रावाला, पहले किया हुआ भोजन जीर्ण हो जाने पर, वीर्य के जो विरुद्ध न हो ऐसा भोजन बिना बात करता हुआ, बिना हँसता हुआ, दत्तचित्त हो कर और अपने आपको अच्छी तरह देखकर (समझ कर) भोजन करे। परीक्षाकाल में आहार लेने में विशेषरूप से सावधान रहना चाहिए।

**आहारस्य निद्रायाश्च सम्यक् सेवनं यदि करोति कोऽपि छात्रः तर्हि: सः शरीरिकरूपेण मानसिकरूपेण च पूर्णस्वस्थो भवति। पुनरपि स्वास्थ्यानुवर्तनक्रमे नियमितरूपेण व्यायामस्य योगस्य च प्रयोगः करणीय एव।आचार्यः चरकः निर्दिशति यत्-**

**शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्द्धिनी।**
**देहव्यायामसंख्याता मात्रया तां समाचरेत्।।**

**(च.सू. 7/31)**

**यद्यपि व्यायामसम्बन्धी एषः निर्देशः सामान्यजनानां कृते सामान्य एव वर्तते। न ह्यत्र विद्यार्थिनां परीक्षार्थिनां वा कृते पृथक्रूपेण विशिष्टः निर्देशो वर्तते। परन्त्वत्र विचारणीयमेतद् वर्तते यद् विद्यार्थी परीक्षार्थी वा विशेषेण मानसिकं श्रमं करोति चिन्तातुरश्चापि भवति, अत एव तत्र शारीरिकश्रमस्त्वाश्यको भवति। अनेन चिन्तापगमनं भवति शरीरपुष्टिरपि च जायते। निरन्तरोपवेशनेन यत् शरीरशैथिल्यं भवति तस्यापि निवारणं भवति अनालस्यं चापल्यञ्चोपजनयति व्यायामः।**

यदि कोई छात्र आहार का और निद्रा का ठीक प्रकार से सेवन करता है तो वह शारीरिक रूप से और मानसिक रूप से पूर्ण स्वस्थ होता है। फिर भी स्वास्थ्यानुवर्तन क्रम में नियमित रूप से व्यायाम का तथा योग का प्रयोग करना ही चाहिए। आचार्य चरक निर्देश देते हैं कि - जो इष्ट (अभीष्ट, उपयुक्त) शरीर की चेष्टा स्थिरता लाने के लिए और बल को बढ़ाने वाली है, उसे देह व्यायाम कहा जाता है उसे उचित मात्रा में करनाचाहिए।

यद्यपि व्यायाम-सम्बन्धी यह निर्देश सामान्य लोगों के लिए सामान्य रूप से ही है। यहाँ पर विद्यार्थियों या परीक्षार्थियों के लिए पृथक् रूप से विशेष निर्देश नहीं है। परन्तु यहाँ यह विचारणीय है कि विद्यार्थी या परीक्षार्थी विशेष रूप से मानसिक श्रम करता है तथा चिन्तातुर भी होता है इसलिए उसके लिए शारीरिक श्रम तो आवश्यक होता है। इससे चिन्ता दूर होती है तथा शरीर की पुष्टि भी होती है। निरन्तर बैठे रहने से जो शरीर-शैथिल्य होता है उसका भी निवारण होता है, आलस्य की रहितता और चंचलता (स्फूर्ति) भी व्यायाम उत्पन्न करता है।

**विद्यार्थिनां कृते विशेषेण तु परीक्षार्थिनां कृते योगस्य प्रयोगोऽपि परमावश्यकः। योगासनैः शरीरबलमवाप्यते तथाध्याय-धारणादिभिश्च विद्यार्थिनः चित्तप्रसादो भवति तथा धीधृतिस्मृतीत्यादीनामभिवृद्धिर्भवति। नकारात्मकानामथ निषेधस्वरूपाणां विचाराणामवरोधः जायते तथा**

**सकारात्मकानां विचाराणामभ्युदयो भवति। इन्द्रियाभिग्रहस्य मनोनिग्रहस्य च सामर्थ्यमुपजायते। मनसि स्थैर्यमूर्जायाः सञ्चरणञ्च शरीरे भवति।**

**भो परीक्षार्थिन् ! मा भैषीः। नियमितरूपेणाध्ययने निरतेन त्वया आहाराचारशरीरचेष्टायोगासन-प्राणायाम-धारणाध्यानसमाधीनां सेवनं कर्तव्यम्। निश्चितरूपेण सफलतामवाप्स्यसि। सर्वदाऽध्ययने कृतबुद्धिर्भवेच्छिष्यः एतदेव निर्देशवाक्यं सर्वदा स्मरणीयमनु करणीयं परिपालनीयञ्च।**

विद्यार्थियों के लिए विशेष रूप से तो परीक्षार्थियों के लिए योग का प्रयोग भी परमावश्यक है। योगासनों के द्वारा शरीर-बल प्राप्त होता है तथा ध्यान-धारणा आदि से चित्त की प्रसन्नता होती है तथा धी-धृति-स्मृति इत्यादि की अभिवृद्धि होती है। नकारात्मक तथा जो निषेधात्मक हैं ऐसे विचारों का अवरोध होता है तथा सकारात्मक विचारों की उत्पत्ति होती है। इन्द्रियों का और मन का नियन्त्रण करने की सामर्थ्य उत्पन्न होती है। मन में स्थिरता और शरीर में ऊर्जा का सञ्चार होता है।

हे परीक्षार्थियों ! डरो मत। नियमित रूप से अध्ययन में लगे हुए तुम्हारे द्वारा आहार, आचार (सदाचार) शरीर चेष्टा (व्यायाम), योगासन, प्राणायाम, ध्यान, धारणा और समाधि का सेवन (प्रयोग) किया जाना चाहिए। निश्चित रूप से सफलता प्राप्त करोगे। शिष्य सदा अध्ययन में कृतबुद्धि (उसी में पूरा ध्यान लगाया हुआ) होना चाहिए, यही निर्देश वाक्य सदा स्मरणीय है, अनुकरणीय है तथा परिपालनीय है।

**८०, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**दीक्षामादाय यो नित्यं द्रव्यं गृह्णाति दुष्टधीः।**
**अम्बां विक्रीय दासीं स गृह्णन् निन्द्यो बुधैस्मृतः।।**

जो दुर्बुद्धि मनुष्य मुनि दीक्षा लेकर भी द्रव्य का संग्रह करता है, वह माता को बेचकर दासी को ग्रहण करने वाले के समान, बुद्धिमानों से निन्दनीय होता है।

**कटिसूत्रं परित्यज्य गृह्णन् द्रव्याधिकं मुनिः।**
**यः स किं न हि लज्जेत लोकमध्ये च रङ्कवत्।।**

जो मुनि कटिसूत्र को भी छोड़कर द्रव्यादि को ग्रहण करता है, वह जनसमूह के बीच रङ्क के समान लज्जित क्यों नहीं होता ?

**धनधान्यादिकं सर्वं त्यक्त्वा गृह्णन् पुनः स्वयम्।**
**यो निर्लज्जः स किं न स्याद् वान्तस्वादनतत्परः।।**

जो निर्धन धन-धान्यादिक सर्व परिग्रह को छोड़कर पुनः उसे स्वयं ग्रहण करता है, वह नमन किये गये वस्तु का स्वाद लेने में तत्पर क्यों नहीं होता है। अर्थात् इसे अवश्य लज्जित होना चाहिये।

**लोभशत्रुरतिदुःसहोऽङ्गिनं, सर्ववस्तुपरिभक्षणलोलः।**
**लोभः स्वजनानपि तस्य, यो वशो व्रजति सोऽपि दुर्गतिम्।।**

समस्त वस्तुओं को खाने में लम्पट लोभ रूपी शत्रु शरीरधारियों के लिये अत्यन्त है। वह लोभरूपी शत्रु स्वजनों को भी मार डालता है। जो इस लोभ के वशीभूत होता है, वह भी दुर्गति को प्राप्त होता है।

**सन्तोषं कुरु सर्वसौख्यजनकं दुःखार्णवोत्तारकं,**
**सद्धर्मामलरत्नसागरपरं पापान्तकं निःस्पृहम्।**
**मोक्षस्वर्गवशीकरं गुणनिधिं तीर्थेश्वरैः सेवितं,**
**चिन्तादुःखभयादिदूरमसमं लोभं त्यज त्वं सदा।।**

जो समस्त सुखों का जनक है, दुःख रूपी सागर से तारने वाला है, सद्धर्म रूपी निर्मल रत्नों का सागर है, पापों का अन्त करने वाला है, निः स्पृह है, मोक्ष और स्वर्ग को वश में करने वाला है, गुणों का भण्डार है, तीर्थंकरों द्वारा सेवित है, चिन्ता दुःख और भय आदि से दूर है ऐसे सन्तोष को धारण करो और लोभ को सदा छोडो।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा




You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य ● ₹ 800/- ORGANISER (साधारण डाक द्वारा)

विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,